Vol. IV, No. 2. August, 1935.

JOURNAL

OF THE

ANNAMALAI UNIVERSITY

EDITOR

Professor B. V. Narayanaswami Naidu, M.A., B.Com., Ph.D., Bar-at-law.

EDITORIAL BOARD

Professor C. S. Srinivasachari, M.A.

Professor S. Somasundara Bharati, M.A., B.L.

Professor A. Narasinga Rao, M.A., L.T.

Professor S. Ramachandra Rao, M.A., Ph.D. (Lond.), F. Inst. P. (Lond.).

Professor S. N. Chakravarti, M.Sc., D.Phil. (Oxon).

Professor K. Rama Pisharoti M.A., L.T.

Published by the University

ANNAMALAINAGAR

1935

NOTICE

To contributors and others

Contributions, remittances, books for review, exchanges and correspondence regarding all matters may be addressed to:—

Dr. B. V. Narayanaswami Naidu

Economics Department,

Annamalai University,

Annamalainagar.



HIS EXCELLENCY LORD ERSKINE, G.C.I.E.

(CHANCELLOR)

THE HON'BLE DR. RAJAH SIR ANNAMALAI CHETTIAR KT.,
OF CHETTINAD, LL.D.
(PRO-CHANCELLOR)



DEWAN BAHADUR S. E. RUNGANADHAN

(VICE-CHANCELLOR)

1929-35

THE RT. HON'BLE V. S. SRINIVASA SASTRI P.C., C.H., LL.D.
(VICE-CHANCELLOR)

Annamalai University Sanskrit Series: No. 2.

SABAPATHI VILASA NATAKA

—*Mm. Dandapaniswami Dikshitar.*

सभापतिविलासनाटके पञ्चमोऽङ्कः ।

(नेपथ्ये)

नीत्वा कल्पशतोपमानि फणिनां पत्या समं कानिचित्
संख्यातानि दिनानि पुण्यकथया स्तोत्रेण मन्त्रेण च ।
संप्राप्ते गुरुपुष्ययोगमहिते मध्यन्दिनस्यात्मजः
तस्मिन्नह्नि शिवस्य ताण्डवमसौ द्रष्टुं समुत्कण्ठते ॥ १ ॥

(चूलिका)

(ततः प्रविशति व्याघ्रपादः सहोपमन्युकौण्डिन्याभ्यां पतञ्जलिश्च ॥)

व्याघ्रपादः—सखे ! परमशिवप्रसादसंविभागदायाद ! कच्चित्पूरयिष्यति मनोरथमस्माकमम्बिकागृहमेधी ?

न तथा साम्राज्यसुखान्न सुधास्वादान्नवापरज्ञानात् ।
तोषो यथाजनानां मनोरथेनैव पूर्णेन ॥ २ ॥

पतञ्जलिः—(विहस्य) सखे ! व्याघ्रपाद ! कोऽयं भगवद्वचनेऽपि सन्देहः ?

व्याघ्रपादः—तर्हि चित्सभाभ्यन्तरमधिगत्य भगवदागमनं प्रतिपालयामः ।

(सर्वे तथेति वीथीप्रवेशमभिनयन्ति)

उपमन्युः—पुरोऽवलोक्य (सहर्षम्) अहो ! रामणीयकमनवद्याया निषद्याया-इयंहि—अद्य तावदतिहृद्यवाद्यमानवीणावेणुपणवगोमुखझल्लरीमुख-

विविधवाद्यमुखरितविशङ्कटहाटकमकुटपरिवाटिकोपचीयमानसमीचीनभाव - मर्मनिर्मितनर्महर्म्यशृङ्गसङ्घटितकाञ्चनकेतुपरिपाटीसमाटीकमानकान्तिधाटी - चित्रीयमाणगगनाभोगा समन्ततः सिच्यमानहिमसलिलपृषतसन्दोहतुन्दि- लमन्दतरगन्धवहविलासनानट्यमानमन्दारपल्लवसन्दितस्य[१]न्दनमालिकास - मिन्धानरुचिबन्धसन्धीयमाना वन्ध्यादरसकलपौरसमुत्तम्भितद्वारकायमानम- णिस्तम्भपरिष्काररराजरम्भाम्रकदम्बक्रमुकपुण्ड्रेक्षुरुचिकवचमेचकितधरणीतला वेलाविलंघिकुतुकनीलालकाजनमणिमयभूषणकिरणकल्प्यमानशातमखशरा - सनशतदन्तुरितदिग्विभागा ससम्भ्रमसमुच्चलितशैवजनरुद्राक्षमालिकापर- स्परासङ्गप्रवृत्तघणघणारणितनिष्पीतशब्दान्तरा निरन्तरविकीर्यमाणघनसार- घुसृणसौरभीसमुद्भ्रान्तलोलम्बकदम्बमुखरिता वेदिकान्तरवितानविलम्ब मानविकचचम्पककुटजपूथिका वीथिका ।

व्याघ्रपादः—वत्स ! पश्य पार्श्वयोरेतस्याः

मृदुलपवनासङ्गप्रोङ्खोलकाञ्चनतोरण-
प्रकररभसाकृष्टोन्मुक्ता मुहुर्ध्वजराजयः ।
मधुरमधुरं जल्पाकीभिः मणीमयघण्टिका-
ततिभिरभितः चित्रं क्रीणन्ति पश्य चिराय नः ॥ ३ ॥

पतञ्जलिः—(सर्वतो निर्वर्ण्य) अहो ! प्रमोदातिशयः पौराणाम् ।

धूलीभिः कौङ्कुमीभिः क्वचन विदधते विभ्रमं सान्ध्यमेके
पङ्कैः कस्तूरिजैः केऽपि च घननिकरं कुत्रचिद्वर्तयन्ते ।

---

१. स्यन्दनमालिका गृहद्वारतोरणम् भाषायां ।
"வாசமாலை" इति प्रसिद्धा.

आकल्पैः केऽपि पौष्पैः क्वचिदुडुपटलं प्रौढमाढौकयन्ते
कार्पूरैर्द्राक्परागैः कतिचन कुहचिच्चन्द्रिकां सान्द्रयन्ते ॥ ४ ॥

कौण्डिन्यः—तदो इदो दिण्णहियऐहिं अम्मेहिं णमुणीओ महन्तो कालादिपादो जदो दिवसस्स तिभाअं अलंकुणन्तो एह्णिं एसो ।

मोहेहिं भुवणन्धआरहरणामोहेहिं अम्भोरुहे
पासुत्ताण महूणि गेह्णिअ मदा पुप्पन्धयाणं चिरम् ।
पच्चग्गम्बुइणीदलन्तखुहरे वासक्कवाञ्चावहो
तेल्लोक्कैकविलोअणो विअअदे णालीइणीणाअओ ॥ ५ ॥

(छाया) – तत इतो दत्तहृदयैरस्माभिः न ज्ञायते महान्कालातिपातः । यतो दिवसस्य त्रिभागं अलङ्कुर्वन्निदानीमेषः—

" मयूखैर्भुवनान्धकारहरणामोघैरम्भोरुहे
प्रसुप्तानां मधूनि गृहीत्वा मदात्पुष्पन्धयानां चिरम् ।
प्रत्यग्राम्बुजिनीदलान्तकुहरे वासैकवाञ्छावहः
त्रैलोक्यैकविलोचनो विजयते नालीकिनीनायकः ॥

व्याघ्रपादः—सखे ! पतञ्जले ! बालोऽप्ययं सदृशं वर्षीयसः समाख्याति । तद्वयं सभासविधमुपसर्पामः ।

(तथेति सर्वे सभासमीपमुपसर्पन्ति)

पतञ्जलिः— (अञ्जलिं बध्वा)

निष्कर्षोऽसौ पावनानां निदानं
कल्याणानां, कारणं शैवभक्तेः ।

मोक्षद्वारं मोहभाजोऽपि जन्तोः
दिष्ट्या सेयं दृक्पथे दिव्यगोष्ठी ॥ ६ ॥

उपमन्युः—हन्त ! मनसोप्यगोचरो महिमा ; किं पुनर्वचसः, हेमसंसदः ।

व्याघ्रपादः—दुरधिगममहिम्नो महाकुहनानाटकसूत्रधारस्य भगवतः प्रियेयं किल रङ्गभूमिः ॥ अतः पश्य—

अष्टावस्याः कुलशिखरिणःस्तम्भलीलां वहन्ते
लोकाश्चोर्ध्वं षडपि दधते तत्तुलाशिल्पशोभाम् ।
विस्तारोऽयं हसति विविधद्वीपधात्रीं धरित्रीं
चित्तस्यायं पथि किमु भवेच्चित्सभायाः प्रभावः ॥ ७ ॥

पतञ्जलिः—समन्ततो निर्वर्णयामः (इति कतिचित्पदानि गत्वा साश्चर्यम्)

ज्वलत्तपनसप्रभा भसितपुण्ड्रनित्योज्वलाः
विशुद्धमखिलं जगद्विदधतः कटाक्षोर्मिभिः ।
शिवार्चनसुधाझरीप्रशिथिलान्यलभ्यादराः
त्रयो निगमसागरा धुरि सहस्रमेते द्विजाः ॥ ८ ॥

कर्णंदत्वा ! (किं ब्रूथ ? "परमशिवस्येव युवयोरपिदर्शनं प्रार्थयामहे" इति) किमेवमभिधातव्यमायुष्मद्भिः । अस्माकन्तु लब्धमेव परमशिवदर्शनं ; किन्तु परमानन्दताण्डवदर्शनमभ्यर्थयामहे ।

(इति परिक्रम्य पुरोऽवलोक्य)

तरङ्गाणां चन्द्रोदयतरलितस्येवजलधेः
प्रवाहाणां वर्षास्विव दिविजसिन्धोः तटभिदः ।

ततश्चेतश्चापि द्रुतगमनमागत्य चरतां
नराणामत्रायं किमपि समवायो विजयते ॥ ९ ॥

(नेपथ्ये शंखध्वनिः)

व्याघ्रपादः—(ऊर्ध्वमवलोक्य) कथमयमम्बरमध्यमारुढो भगवानंशुमाली !

नीरन्ध्रद्युतिधोरणीविकिरणक्रीडत्पतङ्गोपल-
ज्योतिश्चक्रपरंपराक्रमदुरालोकक्षमामण्डलः ।
लोकान्हेमसभां नयन्पशुपते र्द्रष्टुं ध्रुवं ताण्डवं
तैरित्थं स्वयमप्युपैति गगनक्रोडं रुचां नायकः ॥ १० ॥

(निश्वस्य) हन्त नाद्यापि भगवदागमनचिह्नानि ! अथवा क्वायमतिविषमविविधविषयकषायदूषितस्वान्तपरिपाको लोकः ? क्वचापितदकलङ्कनिस्तरङ्गहृदयमुनिजनसंवेद्यमानमानन्दताण्डवमीश्वरस्य सर्वथा गगनकुसुममवतंसयितुकामस्य सरणिमनुसृताः स्मः ॥

पतञ्जलिः—सखे ! व्याघ्रपाद ! माभैषीः नाद्यापि अतिवतते भगवदागमनसमयः ।

व्याघ्रपादः—सखे ! न विधुबिम्बादमृतादन्यन्निस्सरति । पश्य—

निर्दिष्टो विभुना स एव जगतां नेत्रोत्सवो वासरः
सा चेयं हि सभैव या पशुपते रिष्टेति शिष्टैरिता ।
षष्ठं भागमलङ्करोति भगवानह्नश्च भासांपतिः
पश्यामो न मनीषितस्य च लवं हा ! वञ्चिताः शम्भुना ॥ ११ ॥

उपमन्युः—तात ! नहिभक्तजनस्य शोकमुत्पादयति देवः ।

पतञ्जलिः—सखे ! नापराद्धा भवति पारमेश्वरी प्रतिज्ञा ।

व्याघ्रपादः—सखे! आश्वासनशीलः खल्वसि ।

(नेपथ्ये दुन्दुभिध्वानः)

पतञ्जलिः—वयस्य! यथायं अभिनवजलसंभारगम्भीरमांसलवलाहकस्तनितसब्रह्मचारी देवदुन्दुभिध्वनिः श्रूयते तथा देवेन सन्निहितेन नटराजेन भवितव्यम् ।

(सर्वे सानन्दमाकर्णयन्ति)

पतञ्जलिः—(ऊर्ध्वमवलोक्य) कथमुपर्युपरि पतद्भिरापूर्यते गगनमण्डलममृतान्धोभिः

उपमन्युः—(साश्चर्यम्)

नभश्चरविलासिनीकरविसृष्टकल्पद्रुम-
प्रसूनघनसौरभीघुमघुमायमानान्तराः ।
कथं निबिडसंपतद्विबुधलोकभूषामणी-
गणद्युतिविचित्रिताः किमपि तिल्ववन्या भुवः ॥ १२ ॥

कौण्डिन्यः—पेच्चह सण्णिहिदो भअवन्तो जम् विअसिअकमलसहस्सभूसिओपरिपददिः भाईरहीप्पवाहो ।

(छाया) पश्यत सन्निहितो भगवान् चन्द्रशेखरः । यद्विकसितकमलसहस्रभूषित परिपतति भागीरथीप्रवाहः ।

उपमन्युः—(विहस्य) वत्स! नासौ भागीरथीप्रवाहः ।

नयननिकरैश्चित्रं गात्रं निजं पुरविद्विषे
कमलकलिकानद्धां मुग्धामिव स्रजमर्पयन् ।

हिमकरकराकारं हारं वहन्नुरसा रयात्
अयमवतरन्नाकात्पाकाहितः समुदीक्ष्यते ॥ १३ ॥

(सर्वे ससंभ्रमं पश्यन्ति)

पतञ्जलिः—इतश्च—

तार्तीयीकं पुरारातेरीक्षणं पुरशोषणम् ।
आविरस्ति महः किञ्चिदाम्नायगृहमेधि यत् ॥ १४ ॥

कौण्डिन्यः—(सभयम्) हंहो विअडणअणवदणभूभङ्गभअङ्करा महाभूदा
(छाया)हन्त ! विकटनयनवदनभ्रूभङ्गभयङ्करा महाभूताः ।

उपमन्युः—वत्स ! माभैषीः

पङ्गुक्ष्वेडाटोपक्षुभितजगदण्डान्निजगणान्
कटाक्षैः साकूतैः किमपि गमयन्प्रीतिमधिकाम् ।
प्रियः पुत्रो भानोर्महिषवरपृष्ठेऽतिविपुले
करं वामं न्यस्यापतति समवर्ती सभगवान् ॥ १५ ॥

व्याघ्रपादः—(पुरोऽवलोक्य)

करधृतमहाखड्गः प्रेतासनः कटुगर्जित-
क्षुभितजगतीचक्रो वक्रोन्नतोन्नतनासिकः ।
अहह वपुषा लोकं भीतिन्नयन्नतिभीषणां
गगनसरणिं रुन्धे हन्तेह को रजनीचरः ॥ १६ ॥

पतञ्जलिः—स एष दिक्पालचूडामणिः निर्ऋतिर्नाम ।

व्याघ्रपाद :—

कटकमकुटीमुख्याकल्पान्तरालसमुन्मिष-
न्मरकतरुचां बृन्दैर्विस्तारयन्नपराम्बुधिम् ।
रुचिकवचिताकाशं पाशं करेण विघूर्णयन्
पतिरयमपां पन्थानं नः परिष्कुरुते दृशोः ॥ १७ ॥

पतञ्जलिः—

नभोन्तरनिरन्तरप्रसवकन्दलीदन्तुराः
लसत्कुसुममोदितभ्रमरबृन्दगोष्ठीभिदः ।
अमी श्रमविनोदिनः किमपि गन्धवाहाङ्कुराः
वलन्ति सुरसुन्दरीचिकुरबन्धगन्धोर्मिलाः ॥ १८ ॥

व्याघ्रपादः—(सफलमिदानीं जन्म, यतः)

अस्तोकैरलकापुरीसहचरैराविर्भवद्भिर्ग्रहैः
शंखाद्यैर्निधिभिश्चिरेणनवभिः सन्द्रिष्टवर्त्मा पुरः ।
प्रायो गुह्यकयक्षकिन्नरगणैर्नीरन्ध्रयन्नम्बरम्
देवस्यापि सखा सुखाय धनदो दिष्ट्या दृशोर्वर्तते ॥ १९ ॥

उपमन्युः—(साञ्जलिबन्धम्)

चतसृषु दिशासु देवागमनं प्रतिपालयन्निजैर्वदनैः ।
प्रविशति दभ्रसभान्तरमयं विधाता समं गिरां देव्या ॥ २० ॥

पतञ्जलिः—(सानन्दं सगद्गदञ्च) सखे ! उपर्युपर्युत्सवं प्रमोदामहे यदयमक्षिपथमवतीर्णो लक्ष्मीपतिः । पश्य-

Annamalai University Sanskrit Series: No. 2.

SABAPATHI VILASA NATAKA

—*Mm. Dandapaniswami Dikshitar.*

आरुढो वैनतेयं कनकगिरिनिभं पाणिपद्माग्रजाग्र-
चक्रोदग्रप्रभाभि र्दिशि दिशि विकिरन्नैकमादित्यजालम् ।
नव्यामम्भोदमालां विदधदधिनभः कायकान्तिप्ररोहैः
आविस्स्मेराननेन्दुः प्रविशति सविधं चित्सभाया मुकुन्दः ॥२१ ॥

(नेपथ्ये महान्कलकलः)

कौण्डिन्यः—(सभयम्) को इमो संव्वत्तपवणोत्थिअपुक्कूलावत्तअगज्जितलज्जावहो महुमहणचरणाहिघादभिज्जन्तबम्मण्डखण्डणीसरिदबहुलावरणजलघोसगव्वस-व्वंकषो सुणासीरकडिणकुलिसखण्डिअकुलपव्वदपक्खपदणरअनित्तंभओ महाधोसो । (छाया) कोऽयं संवर्तपवनोत्थितपुष्कलावर्तकगर्जितल-ज्जावहो मधुमथनचरणाभिघातभिद्यमानब्रह्माण्डखण्डनिस्सरद्बहुलावरणजलघोष-गर्वसर्वङ्कषःशुनासीरकठिनकुलिशखण्डितकुलपर्वतपक्षपतनरयनिस्स्तम्भको महा-घोषः ?

पतञ्जलिः—(निरूप्य) सखे! व्याघ्रपाद ! सफलमस्माकमिदानीं जन्म । यतोऽतिदू राच्छ्रूयन्ते प्रमथानामतिगम्भीरः ढक्काडमरुकशंखरवपुंखितो महानयं सिंहनादः (सर्वे सानन्दं प्रणमन्ति, उत्थाय विरचिताञ्जलयः तिष्ठन्ति)

व्याघ्रपादः—(सहर्षसम्भ्रमम्)

आवल्गितैः तत इतस्त्रसरेणुपुञ्जैः
आप्यैरहस्करकरान्जडतां नयन्तः ।
आवान्त्यमी हरकिरीटविटङ्कलोल-
मन्दाकिनीतनुतरङ्गभवाः समीराः ॥ २२ ॥

उपमन्युः—(पुरोऽवलोक्य सानन्दम्)

फणिपतिकटकैर्बाहादण्डैर्जाज्वल्यमाननिटिलदृशः ।
त्वङ्गड्डमरुकशूलाः रिंघन्त्येते परःशतं प्रमथाः ॥ २३ ॥

कौण्डिन्यः—अंहहे तदो इदो रअणदण्डमण्डिअमोत्तिआतपत्तविमलचामरकणअकलशभिङ्गारुमुकुरधारिणीणं पमहविलासिणीणं ससंभमचरणविण्णासचटुलनूउरसद्दसमुदञ्चिएणसिञ्चिएणसरभससमापतन्तपमहणिउरुम्बपरप्पराङ्गसङ्गतरलन्तसिसूलसिहासन्ताडनमुहरिआणं डमरुआणं सुदिपुडमहुरेण डिमिडिमिणिणदेण विविहमुखगणमुहमारुदपूरिआणं जलजाणं अदिगम्भीरेण घुमघुमघोसेण विस्मयावणमन्तणारदमुहवेणिअकरपल्लव विप्पाटिआणं वल्लईणं अदिमहुरेण णिक्कणेण गाअन्तीणं किण्णरीणं नडन्तीणमच्चराणं मेहलाकंकणझणझणङ्कारेण जअजअन्ति णमन्ताणं जणाणञ्च कोलाहलेणअ सद्दादुदीओविअ एसो पवञ्चो॥ (छाया) अहो! ततइतः, रत्नदण्डमण्डितमौक्तिकातपत्रविमलचामरकनककलशभृङ्गारुमुकुरधारिणीनां प्रमथविलासिनीनां ससम्भ्रमचरणविन्यासचटुलनूपुरशब्दसमुदञ्चितेन शिञ्चितेन सरभससमापतत्प्रमथनिकुरुम्बपरस्पराङ्गसङ्गतरलत्रिशूलशिखासन्ताडनमुखरितानां डमरुकाणां श्रुतिपुटमधुरेण डिमिडिमिनिनदेन, विविधमुखगणमुखमारुतपूरितानां जलजानामतिगम्भीरेण घुमघुमघोषेण विनयावनमन्नारदमुखवैबणिककरपल्लवविस्फारितानां वल्लकीनां अतिमधुरेण निक्कणेन गायन्तीनां किन्नरीणां नटन्तीनामप्सरसाञ्चमेखलाकंकणझणात्कारेण जयजयेति नमतां जनानां चटुलकोलाहलेनच शब्दाद्वितीयइव एष प्रपञ्चः ।

पतञ्जलिः—सखे निपुणमाकर्णयास्मिन् शब्दैकार्णवौघे ।

वेदान्तवेद्य इति शङ्कर इत्युमाया
भर्तेति शम्भुरिति पालयितेति लोकान् ।

ओँकाररूप इति कश्चिदिहोज्जिहीते
कर्णामृतं किमपि काहलिकानिनादः ॥ २४ ॥

व्याघ्रपादः—(सपुलकोद्गमं पतञ्जलिमालिङ्ग्य) सखे! किं कथयामि; मनसोप्यविषयमानन्दमनुभवामि ।

उपमन्युः—(पुरोऽवलोक्य सविस्मयम्)

चलति पुरतो मेरुः किंवा विभावसुमण्डलं
किमुत तडितां बृन्दं किंवा रवेरियमावली ।
अहह किमिदं वारंवारं बलादपि चोदिता
नयनपदवीं मुष्णत्पुष्णाति तत्वमदो जगत् ॥ २५ ॥

पतञ्जलिः—(साश्चर्यम्) प्रथमं प्रमथा इति गणेन्द्रा इति व्यक्तिविशेषविभक्ता सभेयं केवलमिदानीं तजोविशेषव्यतिकरदुरालोका दृश्यते

कौण्डिन्यः—इमादो ओहसिआणेअसहस्सकिरणमण्डलच्छायादो फहाकदंबादो दाह्मि एदे णिस्सरन्ति मुत्तिमन्तोविअ दिवसअरणिसाअरा महापुरिसा । (छाया) अस्मादपहसितानेकसहस्रकिरणमण्डलच्छायात्प्रभाकदम्बाद्द्वावेतौ निःसरतो मूर्तिमन्ताविव दिवसकरनिशाकरौ महापुरुषौ ।

व्याघ्रपादः—(सानन्दगद्गदम्) सखे! पतञ्जले! दिष्ट्या भगवानितएवाभिवर्तते भानुकम्पेन उपास्यमानो मुग्धेन्दुभूषणः ।

पतञ्जलिः—भगवतोमूर्त्यन्तरमयोऽखिलगणानामीश्वरोनन्दिकेश्वरोऽयम् ; अखिलानपि सेवासमागतानमराधिपानुचलितविचित्रवेत्रलतःसंस्थापयन्ततइतःसञ्चरति ।

(सर्वे कृतयथोचितसमुदाचाराः विरचिताञ्जालयः तिष्ठन्ति)

(ततः प्रविशति वेत्रपाणिः नन्दिकेश्वरो भानुकम्पश्च)

नन्दी—(समन्तादवलोक्य, किञ्चिदुच्चैः)

विष्णो! स्वागतमत्र तावदधुना ब्रह्मन्निहैवास्यतां
शक्र! त्वं धुरि तिष्ठ साकममरै र्ब्रह्मर्षयः! स्थीयताम्।
नाथः पश्यति नः सभापतिरयं देव्या सहैवोमया
कारुण्याम्बुनिधिः करोति दहराकाशान्तरे नर्तनम्॥ २६॥

भानुकम्पः—(साटोपम्) भो भोः पुरशासनकटाक्षलवलब्धनिजाधिपत्याः सर्वेष्या-दित्याः किमितिबधिरयन्ति दिगन्तराणि भवन्तो नटराजपदारविन्दनूपुररव-तिरोधानकल्मषकलुषेण वृथाकलकलमुखरेण परस्पराङ्गचमत्कारचटुलभूषणम-णिगणखणखणाटोपेन। नन्वेते सन्निहिताः खलु शङ्करकिङ्कराः।

पतञ्जलिः—सखे! पश्य अनेन भानुकम्पवचनसंरम्भेण निष्कम्पमजनि चित्र-गतमिव सर्वमपि गीर्वाणचक्रम्

(सर्वे विस्मयन्ते)

नन्दी—वत्स! भानुकम्प! (सर्वतोऽवलोक्य) कुतो वा भगवतः प्रियभक्तौ पतञ्जलि-व्याघ्रपादौ?

भानुकम्पः—नातिदूर एवैतौ। नन्दी—(सानन्दमुपसर्पति)

(पतञ्जलिव्याघ्रपादौ, उपमन्युकौण्डिन्यौ च सप्रश्रयमुपसृत्य नमस्कर्तुमुद्युञ्जते)

नन्दी—(सानन्दमुभावालिङ्ग्य) न सांप्रतमितरनमस्कारः देवदेवसन्निधाने। वत्स! पतञ्जले! वाचां खलुपारेभवदीयमत्यद्भुतं चरित्रम्।

विधिहरिमुखदेवा वीक्षितुं यद्यतन्ते
विहितविमलयोगाद्ध्यानमय्यैव दृष्टया।

तदिह हि तपसित्वा चार्मणीनां दृशाम-
प्यहह पथि पुरारेस्ताण्डवं दर्शितं यत् ॥ २७ ॥

पतञ्जलिः—(सप्रश्रयमञ्जलिंबध्वा) देवदेवस्यैवायं प्रभावः यः पुनरणुं पर्वतयति ; पर्वतमप्यणयति.

नन्दी—(निवृत्य) वत्स ! व्याघ्रपाद !

यत्तप्तं परमं तपो भगवतः श्रीमूलनाथस्य यत्
पूजा यत्तनयोपनीतमपि ते मान्यं चरित्रं विभोः ।
यद्योगोपि महानभूदभिरतिः चित्ते च यद्भूयसी
सर्वस्यास्य फलं सदृक्षम् (पुनर्विचिन्त्य) अथवा लब्धं त्वयाऽहैतुकम् ॥

व्याघ्रपादः—(सविनयम्) यदाह द्वितीयपरमेश्वरः ।

भानुकम्पः—सखे ! व्याघ्रपाद ! कच्चिदिदं स्मर्यते यद्देवेनाथावादिष्टम्—" देवः त्वय्यनुकम्पते " इति पठति ।

व्याघ्रपादः—स्मराम्यनुभवामिच ।

नन्दी—अभ्यन्तरभक्तौ खलु युवां देवस्य ; तत्समीपे तिष्टतम् । (इत्युभौ हस्ताभ्यां गृहीत्वा देवस्य पार्श्वयोः स्थापयित्वा,) पश्य तं नेत्रयोरमृतवर्षम् । अपनीतैव करुणानिधिना मायायवनिका । अयमिदानीम्—

किञ्चित्कुञ्चितवामहस्तचरणः किञ्चलिकतास्यस्मितो
भूतस्थापितदक्षिणाङ्घ्रिरभयं हस्तेन बिभ्रन्मुदा ।
अन्याभ्यां डमरुं विभावसुशिखां पाण्यम्बुजाभ्यां वहन्
देवो नृत्यति दिव्यसंसदि जगन्नेता सभानायकः ॥ २९ ॥

इतश्च प्रणम्यतां जगन्माता—

अतिघनकरुणासमुत्तरङ्गैरखिलजगन्त्यपि पालयन्त्यपाङ्गैः ।
गिरिशनटनसाक्षिणी सुधाभिर्नयनपथे शिवकामसुन्दरीयम् ॥ ३० ॥

अयञ्च देवो लम्बोदरः ; अयञ्च कुमारः ।

पतञ्जलिः—(सपुलकमञ्जलिंबध्वा) देव शरणागतवत्सल ! करुणासागर ! प्रसीद सभापते !

किञ्चित्कुञ्चितवामपादकमलप्रेङ्खन्मणीनूपुरं
चञ्चत्काञ्चनकिङ्कणीघनधनारम्भप्रियंभावुकम् ।
आमन्दस्मितचन्द्रिकापरिमलक्रीतानमन्मानसं
किंवा भाग्यमकारि ताण्डवमिदं द्रष्टुं जगन्मोहनम् ॥ ३१ ॥

व्याघ्रपादः—(निरन्तरकन्दलदानन्दबाष्पः शिरस्यञ्जलिंनिधाय) देव! भक्तपरिपालन-जागरूक !

दिगन्तरनटज्जटालुलिततुङ्गगंगोल्लल-
त्तरङ्गकुलभाङ्क्रिव्यामुखररोदसीमण्डपम् ।
इदं नटनमीक्षितुं तव चिदम्बरेश ! प्रभो !
दयामय! कियन्मया न सुकृतंपुरोपार्जितम् ॥ ३२ ॥

उपमन्युः—(पुरोवलोक्य) (साश्चर्यम्)

नालं ब्रह्माण्डचक्रं त्रिपुरहरजटाखेलनाडम्बराणां
नालं सप्तार्णवी सा मकुटतटलुठत्सिन्धुबिन्दुच्छटानाम् ।
नालं पातालमूलं भ्रमिनमदवनीपातपौनःपुनीनां
नालं नःचक्षुषी द्वे किमपि पशुपतेरीदृशामुत्सवानाम् ॥ ३३ ॥

कौण्डिन्यः—(सपुलकमञ्जलिंबध्वा)

अच्छीणं मधुपक्कसत्तममलं केव्वल्लघण्टापहो
सव्वस्सं सअलोस्सवस्स परमानन्दस्स गब्भालयो ।
अच्छेराणमियत्तणं किमवरं सारस्स सारं पुणो
अङ्गाणंअ सुहाहिसेअकलणं देवस्स तं तण्डवम् ॥ ३४ ॥

(छाया)

अक्ष्णां मधुपर्कसत्रममलं कैवल्यघण्टापथः
सर्वस्वं सकलोत्सवस्य परमानन्दस्य गर्भालयः ।
आश्चर्याणामियत्ता किमपरं सारस्य सारः पुनः
अङ्गानाञ्च सुधाभिषेककरणं देवस्य तत् ताण्डवम् ॥

व्याघ्रपादः—(सगद्गदम्)

जटापटलधारिणे जनिभवश्रमोत्सारिणे
सदाविनतनन्दिने सकलदेवतानन्दिने ।
शिवाय परमात्मने शिवपदाय विश्वात्मने
नमो दहरवासिने नटनकेलिकोल्लासिने ॥ ३५ ॥

पतञ्जलिः—(देवीं प्रणम्य सप्रश्रयम्) जय! जय!! जगदम्ब! जलरुहभवमुख्यनाकालयव्यूहसेवासमानम्रकोटीरकोटीमणीधोरणीभानुभास्वत्पदाब्जे ! नमच्चित्तरागासिके! चित्तरङ्गासिके! अगाधसंसारहिंसासमातङ्कशङ्कागदङ्कारवीक्षाङ्कुरे! अखण्डविध्यण्डषण्डोपरिद्योतमानालयाकल्पकल्पद्रुमानल्पपुष्पभ्रमद्भृङ्गगीतोदयोल्लासिचिन्तामणिस्यन्दमानाम्बुपूरातिवर्धिष्णुपर्यन्तपीयूषपाथोधिरिङ्खत्तरङ्गच्छटाटोपवल्गत्कणश्रेणिजीवत्प्रपञ्चप्रवृत्तस्तुत प्रक्रिये! ऽविक्रिये! मन्द्रचन्द्राङ्कुरोत्तंसफालनलज्वालमालौघलीलापतङ्गीकृतानङ्गसञ्जीवनावलोकिते! भूरिकारुण्यभारातिखिन्नाशये! वल्गुपाशाङ्कुशेक्षुस्फुरच्चापपुष्पेषुहस्ते! नमस्ते समस्तैकमातः! शिवे! जयजय

शिवकामसुन्दर्यनन्तंदिगन्तंभजन्तंगुणं तावकंभावुकं किं पुनस्स्तो तुमस्तीहकश्चित् सुधीरत्र वृत्ताहिते शस्त्रशब्दासहे ; प्रस्तुतत्रासशुष्यद्वपुष्यञ्जसाभूरिशान्तत्विषि ज्यातिषिस्वाहया सेविते ; जीवित्तेजीवितेशे निराशे मुहुस्त्रस्यति प्रायशोरक्षसि प्राणरक्षौषधंकाङ्क्षति द्रागहोपाशिनि व्याकुलेचानिले वित्तनाथेऽप्यथस्वस्तिकामे चिराल्लज्जयाभङ्गुरे शङ्करे कुण्ठदोर्दण्डचण्डिम्नि हापुण्डरीकेक्षणे मुक्तलज्जामरं त्रस्तविद्याधरं भग्नसाध्यच्छटं खिन्नखिन्नोरगं भिन्नतुन्नार्णवम् खण्डयमानाण्डजं चूर्ण्यमानाचलं पाटयमानद्रुमं भक्षितैणाङ्ककं पातिताहस्करं निर्मनुष्यन्निरालोकमेवं जगद्बाधमानं चिरादेधमानं बलादन्तकस्यान्तकं वेधसो वेधसञ्चेश्वरस्येश्वरं शार्ङ्गिणः शार्ङ्गिणं सर्वलोकद्रुहं माहिषञ्चासुरं प्रोद्यतानेकदोर्दण्डषण्डोल्लसत्खेटखङ्गासिशंखेषुबाणासनाद्यायुधस्तोमकिम्मीरिताशावकाशा ; समप्रोच्चलत्पुष्कलावर्तकध्वानधिक्कारचञ्चून्निमिषसिहंनादार्भटीविस्फुटत्सर्वविध्यन्डभाण्डा ; तटित्कोटिसन्दोहनिन्दाकरा मन्दकल्पान्तकालान्तकालीकनेत्रानलोल्लासस्सच्छात्रक्छेत्रज्वालमालापुषा धीरधीरस्वनद्धण्टिकाकाण्डनिर्घातघोषत्तटत्सन्धिबन्धाधिकाद्रीन्द्रनिर्यच्छिलाधूलिकापालिकापीतदैत्यौघमेहस्स्रवद्रक्तधारापगापूरजालेन्शूलेन निर्भिद्य चण्डञ्च मुण्डन्निशुम्भञ्च शुम्भंमधुं कैटभञ्चाभिहत्वा समस्तासुरानीकमुत्तेजिता वीरलक्ष्मीविलासेनदेवि त्वमेवद्यरक्षः समस्तं समस्तं जगत्तत्क्षणे किं ब्रुवे वा प्रसन्नामपि त्वां नसन्नाभयेनाक्षमानेक्षितुं वाऽमरास्तेऽपिते विक्रमप्रक्रियाजल्पनेऽल्पे पुनः के वयं किं पराऽलं गिरां देवता सापि किं वा परैस्त्वां त्वमेवाभिजानासि लोकाननेकान्यदेकासृजस्यादरेणावसि ध्वंसयस्यम्ब ! केयूरकोटीरभेदेनभिन्नं यथा स्वर्णमेकं तथोपाधिभेदादनेकासि ते मायया मोहिता ह्याद्रियन्ते परं दैवतं नैव संविद्रते त्वां परं तत्वं इत्यल्पपुण्या जना दोष एषत्वयोत्पादितः किं ? नवा यत्प्रपञ्चस्य संवृद्धये नैकमार्गाः कृताः ॥ तावता माद्यति, क्रुध्यति, द्रुह्यति, त्रस्यति, स्फर्धते, खिद्यते क्लिश्यते, याचते, नश्यति भ्रश्यति प्रायशोऽयं-

जनः ; त्वां परेश्रद्धयाराध्य साध्यान्तरं सन्त्यजन्तो मुधैवाभिमानञ्चभोगं तृणा याप्यमत्वाऽमृतत्वं भजन्ते हरप्राणभूते ! जगत्त्राणशीले ! भवत्पादसेवाविधिः सर्वलभ्यः किमस्माकमप्यक्षिपद्यां गतासीति चित्रं यतः तादृशैरप्यजस्रं मुनीन्द्रैः विमृग्यासि तत्त्वामहं भावये चेतसा पाहि शं देहि शैलात्मजे ! ॥

(नेपथ्ये)

अयि ! वत्सौ पतञ्जलिव्याघ्रपादौ !

प्रसन्नोऽहं भक्त्या तव तव च यद्वाभिलषितं
युवामिष्टौ भक्तौ वदतमविलम्बं तदधुना ।
सुखोदर्कं जन्तोः स्मृतमपि च मत्ताण्डवमिदं
समं देव्या दृष्टं यदि किमुत किञ्चात्र दहरे ॥ ३६ ॥

व्याघ्रपादः—(सरोमाञ्चमञ्जलिंबध्वा) देव ! भक्तजनवत्सल !

भगवत्ताण्डवालोकपरमानन्दतोऽपि वा ।
अन्योऽस्ति किं वरः तस्मादस्तु सोऽयं सदैव मे ॥

पतञ्जलिः—(सप्रश्रयम्) देव ! करुणानिधे !

मम माध्यन्दिनेश्चापि मुनीनामत्र वासिनाम् ॥
अलंभावो हि न भवेद्युष्मत्ताण्डवदर्शने ॥ ३७ ॥

निस्तरन्तु महाघोरं सद्यः संसारसागरम् ॥
न पिबन्तु पुनस्स्तन्यं मातुः ताण्डवदर्शिनः ॥ ३८ ॥

14

तदत्र यत्कृतं नृत्तं सर्वमङ्गलया सह ॥
साक्षाद्भूयोपि सर्वेषां तज्जायेत सदातनम् ॥ ३९ ॥

(नेपथ्ये एवं भवतु)

नन्दी—(किञ्चिदुच्चैः) रे रे गणेन्द्रा माविषीदत तिरश्चामपि दृग्विषयो देवताण्डवमिति को वा निवारयिता स्वतन्त्रस्याध्यवसितम् ?

(नेपथ्ये)

तरलहृदयाः किं वा वर्तामहेऽत्र चिदम्बरे
नटनमनिशं शम्भोर्नित्यं निरीक्षितुमीश्महे ॥
किमपि तपसा पूता माध्यन्दिनेश्च पतञ्जलेः
पशुनरसुराः सर्वे निर्वेदपारमुपागताः ॥ ४० ॥

भानुकम्पः—(सश्लाघम्) वत्सौ पतञ्जलिव्याघ्रपादौ! भवतोऽभिनन्द्यते चरितमिदमखिलैरपि वैमानिकैः

उभौ—(तूष्णीमधोमुखौ तिष्ठतः)

(नेपथ्ये) (कलकलानन्तरम्)

माभैष्ट त्रिपुरान्तकस्य सविधे सिंहो जनान्बाधते
किं वा मुञ्चत मानुषा भयवशादाकस्मिकं संभ्रमम् ॥
अस्मिंस्तीर्थवरे निमज्जति ननु श्रीसिंहवर्मा नृपः

उपमन्युः—(साश्चर्यम्) तात सिंहवर्मा नृपतिरागत्य शिवगंगायां स्नाति

व्याघ्रपादः—(सहर्षम्) देवदेवप्रसादपात्रं भवतु तपस्वी।

(पुनर्नेपथ्ये)

हन्ताश्चर्यमिदं सुवर्णसदृशो राजायमालोकयते ॥ ४१ ॥

(सर्वे विस्मयं रूपयन्ति)

याघ्रपाद :—(नन्दिकेश्वरमपवार्य) देव! चिरादेष सिंहवर्मा भगवति महाभक्तियुक्त तदनुभवतु भगवत्ताण्डवावलोकनमहोत्सवम्।

नन्दी—(सन्निधानमभिगम्य, देवस्य भ्रूसञ्ज्ञामुपलक्ष्य) व्याघ्रपाद! भगवता अनुज्ञातः एव तदाहूयतां हिरण्यवर्मा।

पतञ्जलिः—देव! सिंहवर्मेति वक्तव्यम्।

नन्दी—तथैवायं शिवगंगामज्जनात्पूर्वम्; इत आरभ्य देवप्रसादेन हिरण्यवर्मैवायम्

(सर्वे प्रमोदन्ते)

व्याघ्रपादः—वत्स! कौण्डिन्य! झटित्याहूयतां हिरण्यवर्मा।

कौण्डिन्यः—तहा (इति निष्क्रम्य हिरण्यवर्मणा सह प्रविश्य) इदो इदो महाराओ।

हिरण्यवर्मा—(देवास्थानीं दृष्ट्वा साष्टाङ्गं प्रणम्य, उत्थाय सपुलकमञ्जलिंबध्वा)

जय जय कनकसभेश जय जय शिवकामसुन्दरीनाथ।
जय जय करुणासिन्धो जय जय नाट्यैकदेशिक नमस्ते ॥ ४२ ॥

(इति पुनः पुनः प्रणम्य पतञ्जलिव्याघ्रपादावुपसृत्य कृताञ्जलिः तिष्ठति)

भानुकम्पः—देव ! इतो भगवदनुज्ञया काशींगतेन यियक्षुणा पुनरप्यागतं परमेष्ठिना ।

नन्दी—कस्य हेतोः ?

भानुकम्पः—यागे समाहूता अपि नागता भगवदानन्दनटनरसव्यापृताः सर्वे गीर्वाणगणा-इति ।

नन्दी—उच्यतां परमेष्ठी त्रिसहस्रमुनीन्द्रानादाय समापयाध्वरमि इति ।

भानुकम्पः—तथा (इति निष्क्रम्य पुनः प्रविश्य) यथादिष्टमनुष्ठितम् । अन्यच्च ।

नन्दी—किमन्यत् ?

भानुकम्पः—एष खलु मैत्रावरुणिः अमुं मनुवंशप्रसूतिं हिरण्यवर्माणमभिषेचयितुकामो-वर्तते ।

नन्दी—वत्स ! हिरण्यवर्मन् ! नेदानीमुत्तरं दातव्यम् । कर्तव्यञ्च भवता मण्डपगोपुरादिक-मनेकं भगवतः कार्यम् । तदनेन कुलगुरुणासह निजं देशमधिगत्य ; चिरं धर्मेण पालयित्वा प्रजाः, चतुर्मुखानीतैः त्रिसहस्रमुनीन्द्रैः समं पुनरप्या-गम्यताम् ।

हिरण्यवर्मा—यदादिशति द्वितीयपरमेश्वरः ।

(नेपथ्ये)

किमन्यच्चावां प्रियमुपहरामि ?

उभौ—(साञ्जलिबन्धम्) देव ! कारुण्यसागर !

संसारोत्तरणौषधं पथि दृशो र्नाट्यं सदा तावकं
संप्राप्तश्च हिरण्यवर्मनृपतिर्देव ! प्रसादादयम् ।
कैलासादधिकं चिदम्बरमभूद्धामेदमूर्जस्वलं
किं नामान्यदितः परं भगवतो याचावहे सांप्रतम् ॥ ४३ ॥

तथापीदमस्तु (भरतवाक्यम्)

वाग्देव्या सममिन्दिरा विहरतां वर्षन्नपो वासवः
लोकस्यास्तु सुखाय नीतिनिरता रक्षन्तु पृथ्वीं नृपाः ।
भूयासुश्च चिदम्बरे निवसतां पुंखानुपुंखाः श्रियः
चेतः खेलतु चित्सभापतिपदाम्भोजे जनानां सदा ॥ ४४ ॥

इति निष्क्रान्ताः सर्वे)

पञ्चमोऽङ्कः समाप्तः

॥ नाटकञ्चेदं समाप्तम् ॥

श्री

॥ श्रीचित्सभेशाय मङ्गलम् ॥

॥ श्रीसभापतिविलासनाटकम् ॥

अस्य किल नाटकस्य कविः मध्यार्जुनक्षेत्रपरिसरवर्तिमणलूर्ग्रामाभिजनो धर्मराजमनीषिनन्दनो वैयाकरणसार्वभौमो वेङ्कटेश्वरनामा । अत्रनाटके प्रधाननायको व्याघ्रपादः उपनायकः पतञ्जलिः महाभाष्यकारः । फलम्—श्रीमन्नटराजानन्दताण्डवदर्शनम्, इतिवृत्तं प्रख्यातं सूतसंहितादिषु; चिदम्बरक्षेत्रवैभवप्रदर्शनपरम् ॥ रसश्च भक्तक्रयपरपर्यायः शान्तः; अङ्गतया सुनिवेशितैः शृङ्गारादिभिरन्यै रसैरुपस्कृतः ।

॥ कथासङ्ग्रहः ॥

प्रथमेऽङ्के—श्रीचिदम्बरक्षेत्रे तपस्यतो व्याघ्रपादस्य परिचर्यया प्रसन्नेन परमेश्वरेण चिदरबरे निजानन्दताण्डवप्रदर्शनसमुचितस्थलपरीक्षार्थं कैलासात्प्रेषितो नन्दिकेश्वरः निलीनएव तिल्वाटवीमभ्येत्य शिवगङ्गातीरे तपस्यन्तं व्याघ्रपादमवलोकय, श्रीमूलनाथालयं गत्वा; व्याघ्रपादस्य भक्त्यतिशयंभगवदनुग्रहप्रासतद्वरलाभञ्चाभिनन्ध; प्रसङ्गात्तत्रागतं भानुकम्पं गणविशेषं व्याघ्रपादादेशनाय सन्दिश्य, पुनः कैलासं प्रति प्रतस्थे इत्यभ्यवर्णि ॥

द्वितीयेऽङ्के—व्याघ्रपादसूनोः संवर्द्धनाय भगवता श्रीमूलनाथेन क्षीराब्धिप्रदानम् गर्भाङ्कद्वारा। सत्यलोकादागतेन शैलूषगणेन "दारुकावनविलासाभिधनाटकाभि नयः। तत्र च मोहिनीरूपधारिणः श्रीमन्नारायणस्यः, भिक्षाटनरूपधारिणः श्रीपरमेश्वरस्यचात्यद्भुतश्रृङ्गारचेष्टाभिनयश्च प्रत्यदर्शि॥

तृतीयेऽङ्के—श्रीकृष्णस्य सत्यभामया सह तिल्ववने नानाविधश्रृङ्गारविलासाः; उपमन्युसकाशाच्छिवदीक्षावरलाभश्च वर्णितः।

चतुर्थेऽङ्के—मयनिर्मितचित्रपटदलूनव्याजेन सर्वाणि शिवक्षेत्राणि तत्तन्महिमविशेषादिप्रदर्शनपूर्वकं उपवर्ण्य, श्रीमत्पतञ्जलिचरितं प्रपञ्चितम्॥

पञ्चमेऽङ्के—चिदम्बरक्षेत्रे सकलदेवसन्निधौ श्रीमन्नटराजस्यानन्दताण्डवप्रदर्शनं; तत्प्रशंसा चपतञ्जलिव्याघ्रपादयोर्वरप्रदानम् हिरण्यवर्मणो वरप्राप्तिः तस्य राज्याभिषेकश्च वर्णितः॥

इति शिवम्।

त्रिंशच्छ्लोकी

(पट्टाभिरामकृतटीकासहिता)

आम्नायमौलिषु विचक्षणमानसेषु
न्यग्रोधसीम्नि पुरतश्च दृशोर्ममैकम् ।
यद्वस्तु वास्तवमनस्तमितप्रबोध-
माशास्महे तदिदमद्भुतशक्ति किंचित् ॥ १ ॥

सिद्धान्ताः परमभ्यधायिषत यैः श्लोकैरिह त्रिंशता
तानेतान् विशदीकरोमि न ततो दोषो गुणो वापि मे ।
सिद्धान्तो यदि वा तदन्यविषयः सम्पद्यतां तावता
श्लाघामूलकृतोऽथवा परिभवो राज्ञो यथा सैन्यतः ॥

वक्ष्यमाणार्थानां प्रामाणिकत्वमुपपादयन् प्रयोजनप्रदर्शनपूर्वकं निरूपणं प्रतिजानीते ।

मू० स्वानुभूत्येकशरणा विषयाः पूर्वपक्षिणाम् ।
उच्यन्ते तत्रतत्रार्थाः श्लोकैर्द्वात्रिंशता मया ॥ १ ॥

नन्वेतन्निष्ठनिरूपणस्य किं प्रयोजनमत आह—विषया इति ॥ **पूर्वपक्षिणां** विदुषां सभासु पूर्वपक्षं पातयताम् । **विषयाः** पर्यनुयोज्यतया रहस्यत्वेन गोपनीया इत्यर्थः ॥ नन्वस्य पदस्य कोऽर्थ इति पूर्वपक्षं पातयन्तं प्रति त्वया वक्तव्यमिति यदि वादिनः पर्यनुयुञ्जीरन् तदा किं वक्तव्यमत आह—**स्वेति** ॥ तदा विलक्षण-मुखविकारभ्रूकौटिल्यशिरःकम्पहस्तचेष्टादिभिरभिनीयमानानुभवैकप्रमाणतयाऽयमर्थोवक्तव्य इत्यर्थः ॥ १ ॥

मू० न चेति वाच्यं बोधोऽत्र विषयः पूर्वपक्षिणाम् ।
बहवो बहुधा तत्र वादिनः संप्रचक्षते ॥ २ ॥

अत्र एषु मध्ये ॥ २ ॥

मू० ०यत्लक्ष्यमानताभेद्यनञ्युग्धातूक्तिभाक्तः ।
विशेष्योऽर्थ इतः पूर्वविशेष्यस्थं विशेषणम् ॥ ३ ॥

अत्र प्रथममुदाहरणवाक्यार्थं परिष्कृत्य अनन्तरं श्लोकार्थ उच्यते । अत्रोदाहरणम्—नच पाषाणे गन्धवत्त्वं नास्तीति वाच्यम्; तत्रापि पृथिवीत्वेन गन्धानुमानात् । इति ॥ पाषाण इति सप्तम्यर्थो निरूपितत्वम् । वृत्तित्वमसधात्वर्थः । आख्यातार्थश्चाश्रयत्वम् । नञर्थश्चाभावः । पाषाणनिरूपितवृत्तिताश्रयत्वाभाववान्गन्ध इति नास्त्यन्तार्थः ।

ननु असधातुना किं सामान्यतो वृत्तित्वं प्रतिपाद्यते; उत संबन्धविशेषावच्छिन्नवृत्तितात्वरूपेण । नाद्यः; कालिकसंबन्धेन गन्धस्यापि पाषाणवृत्तित्वात् । न द्वितीयः; असधातोर्नानार्थकत्वापत्तेः । अथ वृत्तितात्वमेवासधातुशक्यतावच्छेदकम् । प्रकृते तु संबन्धविशेषावच्छिन्नत्वेन लक्ष्यते । अथवा समवायेनेत्यादिसंबन्धबोधकतृतीयान्तपदमध्याहर्तव्यम् । तदवच्छिन्नत्वं तृतीयान्तार्थो वृत्तित्वेऽन्वेतीति चेन्न; तथा सति सामान्ये समवायेन गुणो नास्तीति वाक्यस्याप्रामाण्यापत्तेः । सामान्यनिरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वाप्रसिद्धेः ॥ अथ सामान्ये समवायेन गुणो नास्ति; पाषाणे समवायेन गन्धो नास्तीत्यादौ सामान्यनिरूपितत्वस्याभावो वृत्तित्वे बोद्ध्यते । न तु तन्निरूपितवृत्तित्वस्याभावो गुणादौ; अतो नानुपपत्तिः । न च सामान्यादौ गुणवत्तां गुणादौ सामान्यसमवेतत्वं वा सन्दिहानं पुमांसं प्रति तादृशवाक्यप्रयोगात् तादृशसन्देहविरोधिबोधजनकत्वं तस्यावश्यकम्; तच्च न संभवति । सामान्यानिरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वनिश्चयेऽपि सामान्यनिरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वसन्देहस्यापि संभवात् । सामान्यानिरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वस्य गुणत्वावच्छेदेनान्वयं स्वीकृत्य तादृशवाक्यस्योक्तसंशयनिवर्तकत्वमपि न संभवति । तादृशनिश्चयेऽपि एक एव गुणः सामान्यादन्यत्र सामान्ये च समवेतस्स्यादिति संभावनाया अनिरासेन पूर्वोक्तसन्देहनिवर्तकत्वासंभवात् इति वाच्यम् । सामान्यनिरूपितत्वाभावस्य गुणनिष्ठसमवायसंबन्धावच्छिन्नवृत्तितात्वावच्छेदेनान्वयं स्वीकृत्य तादृशसन्देहनिवर्तकत्वोपपादनसंभवात् । गुणनिष्ठसमवायसंबन्धावच्छिन्नवृत्तितात्वावच्छेदेन सामान्यानिरूपितत्वनिश्चये सति सामान्ये गुणाभावनिश्चयस्याप्यौचित्यावर्जनीयतया तत्संशयाभावादिति चेन्न । एवमप्याकाशं सामान्ये समवायेन नास्ति इति वाक्यस्याप्रामाण्यापत्तेः; सामान्यानिरूपितस्यापि समवायावच्छिन्नवृत्तित्वस्य गगने बाधात् । यत्तु सामान्ये समवायेन गगनं नास्तीति

वाक्यस्य प्रामाण्योपपत्तये तत्र नञर्थस्य वारद्वयं भानमङ्गीकृत्य सामान्यानिरूपितसमवायसंबन्धावच्छिन्नवृत्तित्वाभाववत् गगनं इति बोधं स्वीकुर्वन्ति ; तन्मन्दमिव प्रतिभाति । अविलक्षणानुपूर्वीस्थले बोधवैलक्षण्यस्य संप्रदायविरुद्धत्वात् ; पृथिव्यां समवाये न गन्धो नास्तीति वाक्यस्य प्रामाण्यापत्तेः; जले समवायेन गन्धो नास्तीति वाक्यस्याप्रामाण्यापत्तेश्च; तादृशवाक्यजन्यशाब्दबोधस्य सामान्यादिविशेष्यकसमवायादिसंसर्गकगगनादिप्रकारकसंशयविरोधित्वानुपपत्तेश्च ।

अत्रोच्यते । "सामान्ये समवायेन गुणो नास्ति", "सामान्ये समवायेन गगनं नास्ति" इत्यादिवाक्यानामप्रामाण्यमिष्टमेव । परन्तु तादृशवाक्यजन्यो भ्रमात्मक एव शाब्दबोधः सन्देहनिवर्तकः । नचैतत्सकलग्रन्थकारमतविरुद्धमिति वाच्यम् । "आकाशं न पश्यति चैत्रः", "आकाशं न पश्यति जात्यन्धः" इत्यादिवाक्यानां शशशृंगं नास्तीतिवाक्यतुल्ययोगक्षेमतयाऽप्रामाण्यमभ्युपगच्छतां **गदाधरभट्टाचार्याणा**मेतद्वाक्याप्रामाण्यस्याभिप्रेतत्वे बाधकाभावात् ॥ यत्तु भूतले घटो नास्तीत्यत्र घटाभावो भूतलवृत्तिरिति नञर्थमुख्यविशेष्यकबोधः समवायेनेति तृतीयान्तार्थः तदवच्छिन्नप्रतियोगिताकत्वमभावान्वयी । तथा च सामान्ये समवायेन गगनं नास्तीत्यत्र समवायसंबन्धावच्छिन्नप्रतियोगिताकगगनाभावः सामान्यनिरूपितवृत्तित्वाश्रय इति बोधसंभवान्नानुपपत्तिरिति । तन्न । तथापि भूतले घटो न समवैतीत्यत्र कीदृशो बोधः ? । न तावद्घटाभावो भूतलवृत्तिरिति । समवेत्युपसर्गद्वयपूर्वकेण्धातोः समवायसंबन्धावच्छिन्नवृत्तित्वार्थकतायाअनुभवाधीनत्वेन घटाभावस्य भूतलासमवेततयाऽप्रामाण्यापत्तेः । न च तत्र भूतलसमवेतत्वाभाववान् घट इति बोध इति वाच्यम् । तथा सति सामान्ये गगनं न समवैतीति वाक्यस्याप्रामाण्यापत्तेः । न च त्वयेव मयापि तादृशवाक्यस्य प्रामाण्यं नाभ्युपेयत एव सामान्ये समवायेन गगनं नास्तीति वाक्यस्य प्रामाण्य एवास्माकमाग्रह इति वाच्यम् । न समवैतीत्यस्य समवायेन नास्तीति वाक्येन विवरणस्य सकलग्रन्थकारसम्मतत्वेन सामान्ये गगनं न समवैति सामान्ये गगनं समवायेन नास्तीति वाक्ययोः पर्यायतया तयोरेकतरस्य प्रामाण्यमपरस्याप्रामाण्यमित्यर्द्धजरतीन्यायहेयत्वात् ॥ यत्तु भूतले घटो नास्तीत्यत्र भूतलान्वितसप्तम्यर्थविशेषितस्याभावस्यासधात्वर्थप्रतियोगितायामन्वयात् भूतलवृत्यभावप्रतियोगी घट इति बोधः । समवायेनेत्यादितृतीयान्तार्थस्तदवच्छिन्नत्वं प्रतियोगित्वान्वयि । न समवैतीत्यत्र तु समवायसंबन्धावच्छिन्नप्रतियोगित्वमेव धात्वर्थः । इत्थं च सामान्यवृत्त्यभावीयसमवायसंबन्धा-

वच्छिन्नप्रतियोगितायाः गगने सत्त्वान्न काप्यनुपपत्तिरिति । तदशुद्धम् । नञसभि-व्याहारे यत्पदार्थस्य यत्पदार्थे येन संबन्धेनान्वयः, तत्संबन्धावच्छिन्नप्रतियो-गिताकतदभावः तद्विशेषणतया बोद्धयते नञेति व्युत्पत्तिविरोधात् । भूतले घटो नास्ति किन्तु पट इत्यत्रानुषज्यमानस्य अस्तीत्यस्य वृत्तित्वबोधकत्वानुपपत्तेश्च । अनुषज्यमानपदाना-मन्तरेणानुपपत्तिप्रतिसन्धानं पूर्वविरुद्धार्थबोधकत्वस्योत्सर्गतोऽनुभवविरुद्धत्वात् ॥

परे तु भूतले समवायेन घटो नास्तीत्यत्र नञ्समभिव्याहृतासधातोरभावोऽर्थः । युक्तश्चैतत् । भू सत्तायामस भुवि इत्यन्योन्यार्थविवासभूधातू विहितौ । तत्राभाव इत्यत्र नञ्समभिव्याहृतभूधातोरभावार्थकतया तत्पर्यायस्य नञ्समभिव्याहृतासधातोरपि तदर्थकत्वं वाच्यम् । अत एव भूतले घटो न भवतीत्यत्र न भवतीत्यस्य नास्तीत्यनेन विवरणं संगच्छते । प्रतियोगित्वमाख्यातार्थः । समवायेनेत्यत्र तृतीयान्तार्थस्तदवच्छिन्नप्रतियोगिताकत्वं धात्वर्थान्वयि । न समवैतीत्यत्र तु समवायसंबन्धावच्छिन्नप्रतियोगिताकाभाव एव नञ्समभिव्याहृतधातोरर्थः । अतो न काचिदनुपपत्तिरिति प्राहुः ॥

अत्र केचित् पूर्वपक्षयन्ति—एतत्कल्पेऽपि नञसमभिव्याहार इत्यादिनियमभंगः । भूतले घटो नास्ति किन्तु पट इत्यत्रानुषज्यमानास्तीत्यस्य वृत्तित्वबोधकत्वानुपपत्तिश्च समानः। अथ स्वभावतो वृत्तित्वार्थकस्य नञ्समभिव्याहारदशायामभावार्थकतामापन्नस्याप्यन्यत्रानुषज्य-मानस्य वृत्तित्वार्थकत्वमुपपद्यते । स्वभावतो वृत्तित्वार्थकत्वात् । अभावार्थकतातात्पर्य-ग्राहकस्य नञः तदानीं तत्राभावात् । न च पूर्वत्रासधातोः प्रतियोगित्वार्थकतातात्पर्य-ग्राहकस्य नञस्तदानीमभावादनुषज्यमानास्तीत्यस्य वृत्तित्वबोधकत्वमस्तीति वाच्यम् । न हि वयं तात्पर्यग्राहकसमवधानासमवधानाभ्यामस्तेरभावार्थकतां वृत्तित्वार्थकतां चाचक्षाणाः परमते तदसंभवमापादयामः ; येन तुल्यता स्यात् । किन्तु पूर्वत्रैकार्थप्रतिपादकस्यान्यत्रानुषज्य-मानास्तीत्यस्य शक्त्या लक्षणया वान्यार्थबोधकत्वमनुभवविरुद्धमित्येव । अन्यथा गंगायां घोषः, न मत्स्यः इत्यत्रापि स्वरसतो बोधापत्तेः । न च त्वन्मतेऽपीदं तुल्यम् । भूतले घटस्य न भावः, किन्तु पटस्येत्यत्र नञ्विनिर्मोकेणानुषज्यमानभाव इत्यस्य स्वरसतो वृत्तित्वबोधक-त्वानुभवेन नञ्समभिव्याहारदशायामभावार्थकतामापन्नस्य नञ्विनिर्मोकेणानुषज्यमानस्य स्वरसतो वृत्तित्वबोधकत्वव्युत्पत्तेः स्वीकारात् । न च प्रतियोगित्वार्थकतामापन्नस्याप्यन्य-त्रानुषङ्गे तथा स्वीक्रियते प्रमाणाभावात् । घटस्य भूतले वर्तमानाभावप्रतियोगित्वं, किन्तु पटस्येत्यस्य प्रमाणत्वापत्तेश्चेति चेन्न ; तथापि न वर्तत इत्यस्य वृत्तित्वाभावबो-धकत्वं न स्यात् । नास्तीत्यस्य न वर्तत इत्यनेन विवरणात् ; तयोः समानार्थकत्वात् ।

तथा चानुभवविरोधः । सामान्ये समवायेन गगनं न वर्तत इत्यस्याप्रमाणतापत्तेः । इष्टापत्तावर्द्धजरतीयन्याय इति ।

तदनालोचनविजृंभितम् । यत एतन्मते नञ्समभिव्याहृतवृत्तित्वार्थकधातूनामभावार्थकत्वं नञर्थाभावविशेषणतापन्नवृत्तित्वार्थकत्वञ्चोभयमेव स्वीक्रियते । तात्पर्यवशाच्चैकैकबोधः । यत्र चैकार्थे बाधकं तत्रापरार्थमादायैव प्रामाण्यमुपपादनीयमिति न काचिदनुपपत्तिरित्यलं विस्तरेण ॥

तथाच पाषाणनिष्ठाभावप्रतियोगी गन्धः इति बोधः । इतिपदस्य गन्धनिष्ठपाषाणनिष्ठाभावप्रतियोगित्वमर्थः । वाच्यमित्यत्रण्यत्वेन रूपेण विधिशक्तस्य कृतः प्रामाण्ये लक्षणा । तदन्वितनञर्थस्य वचिधात्वर्थेऽन्वयः । पुनः कृत्यत्वेन रूपेण कृता विषयो बोद्धयते । तथाच गन्धनिष्ठपाषाणनिष्ठाभावप्रतियोगित्वमप्रमाणोक्तिविषयीभूतमित्यन्वयबोधः । उक्तिश्च श्रावणोपस्थितत्वात्पाषाणे गन्धवत्त्वं नास्तीत्यानुपूर्विकैव । तत्रापीत्यादेश्च पृथिवीत्वज्ञानजन्यतद्विशेष्यकगन्धप्रकारकानुमितेरित्यर्थः । अपिशब्दस्वारस्यात्पाषाणे गन्धस्यालौकिकप्रत्यक्षविषयत्वं प्रतीयतेऽनुभवात्, तस्यापिशब्दार्थस्य तत्पदार्थेऽन्वयात् तदन्तर्भावेण तच्छब्दार्थकल्पनाद्वा उपपादनीयम् । अनुमानादित्यत्र पञ्चम्यर्थ. प्रयोज्यत्वमप्रामाण्यान्वयि । तथा चेदं सर्वमेकं वाक्यम् । नन्वत्र गन्धनिष्ठपाषाणनिष्ठाभावप्रतियोगित्वे उद्देश्ये अप्रमाणोक्तिविषयताविधेयकबोधो न संभवति । तादृशोद्देश्याप्रसिद्धेः । नचास्य वाक्यस्य तदंशेऽप्रामाण्यमिष्टमेव, अभिनिवेशप्रयुक्तत्वादिति वाच्यम् । तथापीतिपदार्थविशिष्टाप्रसिद्धेः । न ह्यसतिवस्तुनि कस्यचिद्वृत्तिः संभवति । न च इतिपदाद्गन्धस्य पाषाणनिष्ठाभावप्रतियोगित्वस्य च खण्डशो भानमिति वाच्यम् । तथाप्यत्रैकवाक्यताबलादितिपदार्थे गन्धे पूर्वपदार्थस्य गन्धस्यान्वयो वाच्यः । स च व्यर्थः । नच पाषाणनिष्ठाभावप्रतियोगित्वमेव इतिपदार्थः । तत्र गन्धस्याधेयतयान्वयः । तावतैव विशेष्यस्थं विशेषणमिति वाक्यार्थोपपत्तेरिति वाच्यम् । तावतापि सर्वं ज्ञानं धर्मिण्यभ्रान्तं प्रकारे तु विपर्यय इति न्यायेन धर्मितावच्छेदकांशे भ्रमत्वं न संभवतीतिचेत्, मैवम् । रजतत्वेन शुक्तिज्ञानानन्तरं रजतत्वेन शुक्तिधर्मितावच्छेदकीकृत्य रजतवानयमितिवाक्यात् भ्रमात्मकबोधस्य सर्वानुभवसिद्धतया तादृशनिश्चयासिद्धेरिति ॥

श्लोकार्थस्तु, **व्यता** व्यत्प्रत्ययेन । **लक्ष्या** लक्षणावृत्या बोद्धया, या **मानता** प्रामाण्यं तस्याः **भेद्यः** स्वप्रतियोगिकत्वसंबन्धेन विशेष्यः **नञ्**

नञर्थोऽभावः । तेन **युज्यते** अनुयोगितासंबन्धेन विशेष्यतया अन्वीयते , या **धातूक्तिः** वचिप्रतिपाद्योक्तिः । **तद्भाजः** तद्विशेष्यस्य । **कृतः** कृदर्थविषयस्य । इतिशब्दपूर्ववाक्यात् यादृशविशेष्ये यादृशविशेषणं बोद्ध्यते तादृशविशेषणरूपोय इत्यर्थः । स विशेष्यः इति । अत्र पाषाणनिष्ठाभावप्रतियोगित्वस्य वारद्वयं भानं त्वनुभवबलादास्थीयते। नास्तीत्यत्र तिङर्थस्योद्देश्यतावच्छेदकघटकतया भानमितिशब्दप्रभावकल्पितव्युत्पत्तिसंकोचादूहनीयम् ॥ अथवा पाषाणे नास्तीति पदत्रयं तात्पर्यग्राहकम् । इतिशब्दार्थे पाषाणनिष्ठाभावप्रतियोगित्वे गन्धस्यान्वयाद्विशिष्टलाभ इत्यादिकं स्वयमूहनीयम् ॥ ३ ॥

इतिशब्दस्य मुख्यविशेष्यार्थबोधकत्वं नेत्याशयेन पक्षान्तरमाह—

मू० आचष्टे प्राग्विशेष्यं वा तद्विशिष्टविशेषणम् ।

गन्धवत्त्वपदं गन्धनिष्ठपाषाणनिष्ठाभावप्रतियोगित्वपरम् । तत्र नच वाच्यमित्यस्यान्वयः । बोधाकारस्तु पूर्ववत् । पाषाणनिष्ठाभावप्रतियोगित्वस्य वारद्वयं भानादिकं तु पूर्ववत् ॥ नन्वत्रगन्धवत्त्वपदस्य गन्धनिष्ठपाषाणनिष्ठाभावप्रतियोगित्वरूपविशिष्टार्थाप्रसिद्धिः । न च गन्धवत्त्वपदात् गन्धस्य पाषाणनिष्ठाभावप्रतियोगित्वस्य च खण्डशो भानमिति वाच्यम् । तर्हि गन्धवत्त्वपदात् गन्धस्य शक्त्या पाषाणनिष्ठाभावप्रतियोगित्वस्य च लक्षणया भानोपगमस्य युगपद्वृत्तिद्वयविरोधेनासंभवादिति चेत् , न । परस्परान्वयबोधस्थले युगपद्वृत्तिद्वयस्याभ्युपगमात् । अयमेव वा पक्षान्तरानुसरणे बीजम् ॥

श्लोकार्थः—पूर्वविशेष्यवाचकपदं तादृशविशेष्यनिष्ठं विशेषणमाचष्टे बोधयतीति ॥

मू० विशेषणान्वितोवच्याद्यर्थस्तत्र विशेषणम् ॥ ४ ॥

पाषाणे नास्तीत्यनेन पाषाणनिष्ठाभावप्रतियोगित्वमुच्यते । प्रतिपादकत्वमितिशब्दार्थः । पाषाणनिष्ठाभावप्रतियोगित्वप्रतिपादकत्वमेव वा इतिशब्दार्थः । पाषाणे नास्तीतितु तात्पर्यग्राहकम् । तथा च गन्धवत्त्वं पाषाणनिष्ठाभावप्रतियोगित्वप्रतिपादकाप्रमाणोक्तिविषयीभूतमित्यन्वयबोधः । श्लोकार्थस्तु—विशेषणान्वितः पूर्वविशेषणान्वितः, तत्प्रतिपादकत्वोक्तिविशेष्यकृदर्थविषयः । पूर्वविशेष्ये विशेषणमिति ॥ ४ ॥

नन्वत्र पक्षे न च पाषाणे गन्धो नास्तीति वाच्यमिति प्रयोगानुपपत्तिः । पुलिंगगन्धशब्दप्रतिपाद्येऽभेदसंबन्धेनान्वितमर्थं बोधयतः विशेष्यनिघ्नस्य वाच्यपदस्य नपुंसकत्वानुपपत्तेरित्यस्वरसादाह ।

न्यायकुलिशः

वादिहम्साम्बुवाहात्रेयश्रीरामानुजार्यविरचितः

Edited with Introduction and Notes
BY
R. RAMANUJACHARI,
AND
K. SRINIVASACHARI,

यस्मादस्माभिरेतद्यतिपतिकथितप्राक्तनप्रक्रियोद्य-
त्कर्मब्रह्मावमर्शप्रभवबहुफलं सार्थमग्राहि शास्त्रम् ।
तं विष्वग्भेदविद्यास्थितिपदविषयस्थेयभूतं प्रभूतं
वन्देयात्रेयरामानुजगुरुमनघं वादिहंसाम्बुवाहम् ॥[1]

भगवद्भाष्यकारश्रीसूक्तिजातजयध्वजम् ।
अत्यद्भुततमन्यायकुलिशाख्यप्रबन्धदम् ॥
अत्रिगोत्रप्रदीपश्रीपद्मनाभार्यनन्दनम् ।
प्रपद्ये परया भक्त्या रामानुजगुरूत्तमम् ॥[2]

---

१. निगमान्तमहादेशिकानुगृहीतोयं श्लोकः ॥

२. रङ्गरामानुजसंयमिविरचितमिदं पद्यद्वयम् ॥

॥ श्रीः ॥

श्रीमते रामानुजाय नमः

न्यायकुलिशे

प्रथमो वादः

अभेद्यं सर्वेषां हतकुमतिगोत्रप्रसरणं
यतीन्द्राद्देशैकप्रवणसुमनस्त्राणनिपुणम् ।
कठोरेष्वात्रेयान्वयतिलकरामानुजकृतं
कथायुद्धेष्वाविष्कुरुत निशितं न्यायकुलिशम् ॥

सिद्धे वेदान्तवाक्यानां प्रामाण्यस्य प्रसिद्धये ।
व्युत्पत्तिरपि तत्रास्ति शब्दानामिति वर्ण्यते ॥

तत्र केचिदाहुः—

नैकैकश्येन शब्देषु व्युत्पादोऽङ्गुलिमुद्रया ।
असिद्धेर्बोधकत्वस्य नचैवं ह्यन्विताभिधा ॥

वृद्धव्यवहारमन्तरेण वाक्यस्य बोधकत्वशक्त्यवधारणानुपपत्तेर्व्यवहारस्यच कार्यबुद्धि·······[पूर्वकत्वेन कार्यरूप एवार्थः । न च पित्रादिभिर्बाला अङ्गुल्या शब्दा] न्निर्दिश्य व्युत्पाद्यन्त इति युक्तम् । तन्निर्देशे तच्छ्रवणमात्रमेव श्रोतुः नार्थ····[प्रतिपत्तिः । तन्निर्देशाभावात् । निर्दे] श्यर्थे निर्दिश्यमाने बुद्धिः स्यात् ।[1] न तस्याः शब्दकारणकत्वे प्रमाणमस्ति । प्रत्युत निर्देशस्यैवार्थप्रतीतिहेतुत्वाच्छब्दस्या तत्परत्वनिश्चय एव स्या····न····[त् । नह्येकस्मा]त् प्रतिपन्ने वस्तुनि प्रत्यर्थ (प्रत्ययार्थ ?) मुपायान्तरार्थनमवकल्पते ।[2] अनुग्राहकत्वंतु केवलायां चेष्टायां

---

१. निर्दिश्यमानार्थविषयकज्ञानमात्रमेव स्यादित्यर्थः ।

२. इदमत्र प्रघट्टकनिष्कृष्टतात्पर्यम्—अङ्गुलिनिर्देशपूर्वकव्युत्पत्तिस्थले अङ्गुलिनिर्देशः अर्थः, शब्दश्चेति त्रयमस्ति । तत्र निर्देशस्य बोधकत्वं अर्थस्य बोध्यत्वं च वादिद्वयसंप्रतिपन्नम् । शब्द एकः परिशिष्यते । सचार्थवद्बोध्योवा निर्देशवद्बोधकोवेति विशये बोध्यत्वमेव संभवति न बोधकत्वमिति पूर्वपक्षी । बोधकत्वएव प्रयोजनादिसंभवात्तदेवाश्रयणीयमिति सिद्धान्ती । इति ।

बोधकत्वदर्शनात् त्वयाप्यनभ्युपगमाच्च नाशङ्कनीयमेव। अतएव हि सहप्रयोगादपर्यायत्वविवेकः। अतएव हि साहित्यविवक्षापि निरस्ता। सा त्वङ्गुलिनिर्देशगोचरतामेव शब्दस्यावहेत्। यदभिमुखो निर्देशस्ततोऽन्यत्र शब्द इति चेत्तदपि शब्दस्य बोधकत्वे विरुद्धं न बोध्यत्वे। बोध्यामङ्गतस्य बोधकत्वानुपपत्तेः। देशतस्साहित्याभावेऽपि कालतस्साहित्यादेवान्यस्योपपत्तेः। कदाचित् केवलाङ्गुलिनिर्देशोऽर्थमात्र इति चेत्किमनेन। न हि प्रत्यक्षवदनुमानस्य वर्तमानविषयत्वनियमः। पराभिप्रायगोचरतापूर्वमेव चेष्टानुमानं सर्वत्र प्रवर्तत इति तदात्वेन शब्दोऽवगन्तव्य इति किमुपपद्यते।[1] भज्यतां वा कथंचिद्गोचरत्वम्।[2] उपायत्वंतु[3] ना····[शङ्का] मप्यधिरोहति। उपायत्वंतु (तत्तु ?) शब्दस्य चेष्टासाहचर्यात्संभवदपि तद्वत्स्यात्। ततश्च सङ्केताधीनमिति शब्दस्याप्यनुमानान्तर्भावः। हस्तचेष्टायावा शब्दवत्प्रमाणान्तरत्वम्। उभयोरेववा समानजातीयत्वेन प्रमाणत्वम्। किञ्च, अयं प्रत्येकपदव्युत्पादनप्रयासोऽन्विताभिधानवादप्रतिभटइति भवद्भिरतीव परिहरणीयः। तथा हि—एकस्यान्विातार्थप्रतिपत्तिहेतुभावोऽशक्यत्वादनुपपन्नः। स्वार्थमात्रप्रतिपत्तिर्जाताऽपि स्मृतिराभिधानिकीवा। नतावत्स्मृतिः तत्र व्युत्पत्यनपेक्षत्वात्। नहि *समादिष्वेकैकदर्शनादितरत्र जायमाना स्मृतिर्वाच्यवाचकसम्बन्धज्ञानमपेक्षते। न च साहित्यमात्रमेवासौ।[4] बोध्यबोधक····[मात्रा] साधारण्यात्। नाप्याभिधानिकी। प्रत्येकपदार्थमात्रगोचराभिधानानभ्युपगमात्। अभ्युपगमे वाभिहितान्वयप्रसङ्गात्। न च प्रथमाभिधाने····[अर्थमात्रबु]द्धिः, द्वितीयाभिधाने पुनरप्यन्विातार्थगोचरत्वमिति वाच्यम्। अभिधानावृत्त्ययोगात्। ननु वाक्येऽन्विताभिधानसिद्धिः इहतु (न तु ?) पदमात्रे, उभयसमभिव्याहारे कः पदार्थ इति †विशेषणन्याय (विवेचने ?) बलादन्विताभिधानमभ्युपगम्यत इति चेत्तथापि स्वार्थमात्राभिधानभङ्गाभावे तदनुपपत्तिः। तद्भङ्गेच तुल्यन्यायेन सिद्धार्थतापि भज्येतैव। अथ सिद्धपरे वाक्यान्तरे अन्विताभिधान-

---

१. इत्येतत्किमुपपद्यत इत्यर्थः।

२. बोध्यत्वमित्यर्थः।

३. उपायत्वन्तु—बोधकत्वं तु।

* सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्यहेतव इत्युक्तेरितिभावः. आद्यपदेन संबन्धिपरिग्रहः, स्मृतिबीजपदं संस्कारवाचि।

४. वाच्यवाचकसम्बन्धः।

† न्यायोऽत्र पदान्तरसमभिव्याहारसप्रयोजनत्वादिरूपः।

व्युत्पत्तिः, पुत्रस्ते जात इत्यादौ हि तथा दृश्यत इति मतम्। तथा सति हि तदेव वाच्यम्। तदुपेक्ष्य यत्प्रत्येकपदव्युत्पत्त्यभिधानं तदन्विताभिधानसिद्धान्तासङ्गताभिधानमिति। अत्र ब्रूमः—

स्मृत्याकारं तु यद्ज्ञानं प्रत्येकपदगोचरे।
तदुदाह्रियते तेषां संसर्गज्ञानकारणम्॥

नहि वयमेकपदार्थमात्रगोचरं ज्ञानमाभिधानिकमुपेक्ष्य (उपेत्य?) तत्रैव संबन्धग्रहं व्युत्पादयामः। अपि त्वर्थस्मृतिरूपमेवाभ्युपेत्य तत्समुच्चयेऽन्विताभिधानं दृष्ट्वा तद्द्वारेण सिद्धे संबन्धावधारणम्। व्युत्पादकोऽस्यायं पिता अयं मातुलः इयमम्बेति शब्दानङ्गुलिनिर्देशपूर्वमभिधत्ते। तत्र श्रोता हस्तचेष्टाभिज्ञानादङ्गुलिनिर्देशोऽर्थगोचर इति कृतनिश्चयस्तदुभयसाहित्यविवक्षासनाथं शब्दमपि कथमपि (मिति?) चिन्तयति।

तत्र तावन्न शब्दोऽयं बोध्यत्वेन विवक्ष्यते।
बोधकत्वविवक्षा हि भवेद्बुद्ध्यार्थवत्त्वतः॥

स्वयमपि हि बालः प्रयोजनालोचनेन सर्वदा प्रयतमानो व्युत्पादकस्याप्तस्यापि चेष्टाशब्दसाहित्यप्रयोगं विवक्षितं प्रयोजनवत्तया सकलस्य (सङ्कलय्य?) शब्दस्य बोध्यत्वे तदपश्यन्नर्थमेव केवलं बोध्यं मन्यते। अतो बोधकत्वेनैव शब्दस्य साहित्यविवक्षा। यत्तु बुद्धे बोधानर्थक्यमिति तदपि पर्यायस्यैव व्युत्पादनाय बोधकान्तरस्य प्रयोग इति प्रत्युक्तम्।

न च प्रयोजनाभावाद्बोध्यत्वमविवक्षितम्।
पुनःस्थापयितुं शक्तः प्रयोगस्सहकल्पितः॥

अर्थस्यैव यदि हानादिप्रयोजनसंभावनया ज्ञापनमभिसंहितं एवं तर्हि व्यवहारापेक्षयार्थस्य शब्दस्य [कार्यपरत्वं] प्रसक्तमितिचेन्न[1]। कार्यस्यात्र—

बोधकेनानुपस्थानात्सिद्धालम्बनवि·······[वर्ण] नात्।
तद्ज्ञानस्य फलंत्वन्यदर्थालम्बनताकृतम्[2]॥

---

१. घटादिरूपार्थस्य हानोपादानादि क्रियासापेक्षतया तदन्वयोऽवर्जनीय इति तादृशकार्यान्वितार्थपरत्वं घटादिशब्दस्य प्रसज्यत इत्यर्थः।

२. शब्दस्य घटादिरूपसिद्धार्थविषयकत्ववर्णनेन बोधकेन घटादिपदेन कार्यस्योपस्थित्यनङ्गीकारेण न कार्यपरत्वप्रसक्तिः। अर्थस्य कार्यसापेक्षस्य विषयताकृतं कार्यान्वयसाकांक्षार्थज्ञानस्य तत्तत्कार्यविशेषान्वयसद्भावज्ञानरूपं फलं भवतीतितु अन्यदित्यर्थः।

मा वा हानादिहेतुत्व (योगित्व ?) मर्थस्य प्रतिसंहितम् ।
[1]तस्मिन्संसर्गविज्ञानं प्रयोजनमिहोच्यते ॥

अयं तातः अयं मातुल इत्यादिप्रयोगेषु साहित्यदर्शनमूलस्मृतिपथविपरिवर्तितातमातुलायंशब्दतदर्थतद्बोधरचेष्टस्य व्युत्पाद्यमानस्य तातशब्दतदर्थव्यावृत्तावप्यनुवर्तमानायंशब्दतदर्थप्रतिसंधानवतस्तातायंशब्दयोरन्वयमर्थादनुपलभमानस्य तदर्थयोश्च शब्दात्सामानाधिकरण्येनान्वयमुपलभमानस्यार्थस्य ज्ञाप्यत्वेनान्वयफल (ज्ञाप्यत्वेऽन्वय ?) ज्ञानदर्शनाच्छब्दस्य तदभावात्तदेवान्वयज्ञानं फलमिति किन्नोपपद्यते ।[2]

अतस्तदेव साफल्याद्बोध्योऽर्थ इति निश्चयः ।
[3]वाचकप्रत्ययश्चात्र संसर्गज्ञानजन्मना ॥
[4]ननु संसर्गविज्ञाने सिद्धे साफल्य (वाचित्व ?) कल्पना ।
तच्च साफल्य (संसर्ग ?) विज्ञानं वाच्यवाचकभावतः ॥

[5]दत्तोत्तरमेतत् । तथाहि—

साहित्यदृष्टिमात्रोत्थवाच्यस्मृतिसहायवान् ।
एकश्शब्दान्तरस्मार्यसंसृष्टस्वार्थ वाचकः ॥

---

१. तस्मिन्—अर्थे, संसर्गः—अन्वयः ।

२. अर्थयोरन्वयज्ञानरूपं फलमुपपादयति अयमित्यादिना । अनुपलभमानस्योपलभमानस्य च व्युत्पाद्यमानस्य बालस्य अर्थस्य ज्ञाप्यत्वेऽन्वयज्ञानदर्शनात् शब्दस्य ज्ञाप्यत्वे तददर्शनाच्च तदेवान्वयज्ञानं फलमित्यङ्गीकार्यमिति किन्नोपपद्यत इत्यन्वयः । तथा च शब्दस्य ज्ञापकत्व एव एतादृशप्रयोजनसंभवात् तदेवाङ्गीकार्यं न ज्ञाप्यत्वं प्रयोजनाभावादिति भावः । तदेवाह अत इति ॥

३. संसर्गज्ञानरूपप्रयोजनसद्भावाधीनो वाचकत्वप्रत्ययश्शब्दस्येत्यर्थः ।

४. प्रथमव्युत्पत्तिस्थले पदमात्रस्यापि वाचकभावोऽस्तीति मन्वानोऽन्योन्याश्रयमाशङ्कते नन्वित्यादिना ।

५. अस्याश्शङ्कायाः पूर्वमेव “अपि तु स्मृतिरूपमेवाभ्युपेत्य” इत्यादिना परिहृतत्वमभिप्रेत्याह दत्तोत्तरमिति । तत्र स्थले प्रत्येकं पदानां स्मारकत्वमेव न वाचकत्वं पदान्तरसमभिव्याहारदशायामेव तत्तत्पदेन तत्तदर्थस्मृतौ सत्यामेकैकपदस्य पदान्तरस्मार्यार्थविशिष्टस्वस्मार्यार्थपरत्वरूपं विशिष्टार्थवाचकत्वमिति ।

एवं तर्ह्यव्युत्पन्नानां शब्दानां वाक्यार्थप्रत्ययायकत्वप्रसङ्ग इति चेत्स्यादेवं यदि तेषां स्वार्थस्मृतिजनकतापि स्यात्। तदा स्मार्यस्मारकत्वलक्षणसंबन्धज्ञानं हि सहकारि निश्चिनुमः। स्मारकाणांतु सहकार्यभावादवाचकत्वम्। हेत्वन्तरेणार्थे स्मृतेऽपि स्वापादितार्थस्मृतिसहायानामेव शब्दानां वाचकत्वमित्यनतिप्रसङ्गः। अतो-ऽङ्गुलिनिर्देशाद्व्युत्पादयन्तोऽपि न तदानीमेव वाचकत्वबुद्धिमुपजनयन्ति। किन्तु साहित्यप्रयोगमात्रेण स्मारकत्वमादधति। तच्च स्मृतिद्वारा प्राप्तसंसर्गज्ञानकालभावि-संज्ञासंज्ञिसंबन्धज्ञानाभिप्रायेणेति विवेक्तव्यम्। अत एतदभिप्रायज्ञानपूर्वकंवा बालानां व्युत्पत्तिः अन्यथा वा। प्रत्येकपदस्मारितपदार्थसंसर्गज्ञाने पदानां कारणत्वदर्शनादेव ह्येषां व्युत्पत्तिः। अतोऽपवादशङ्कानिरासायैव व्युत्पादकपक्षे शब्दसाहित्यनियमस्य प्रयोजनपर्यवसानवर्णनमिति। यद्येवं वाचकत्वग्रहणनिरपेक्षमेव शब्दस्य कथंचित्स्वार्थ-स्मृतिसाधकत्व (स्मृत्याधायकत्व?) ग्रहणमात्रेणाभिधायकत्वं सिध्यतीति मीमांसासूत्र-विरुद्धमिदमापद्यते। उच्यते—

वाच्यवाचकसंबन्धः प्रथमं * यत्र गम्यते।
स्वार्थग्रहणसिध्यर्थं तत्रेदमभिधीयते॥
अत एव ह्यविज्ञातवाच्यवाचकशक्तिषु।
सिद्धान्तान्तरनिष्ठेषु शब्दानां स्यात्प्रधान (प्रमाण?) ता॥

अन्यथा तेषामगृहीतस्वाभाविकसंबन्धानां बोध (अबोध?) काश्शब्दा भवेयुः। न च वयमपि व्यवहारेण व्युत्पत्तिं न मृष्यामहे। यतः प्रथममेवाभिधायकत्वानु........[प] गमः। अभिहितान्वयसिद्धान्ताश्रयणेन वा प्रथमस्मृतिमेवाभिधानमुपेत्य तद्भाषणमिति। यद्वा—

किं वापभ्रंशलिङ्गादिसाधारण्येन बोधनम्।
पश्चाद्विशेष्यमाणं सदभिधानत्वमृच्छति॥
यच्च बोधनमेवादौ संबन्धः फलमित्यपि।
संबन्धान्तरसापेक्षं लिङ्गाद्यस्माद्व्युदस्यति॥[1]

न हि बोध्यबोधकभाव एव सामान्यविशेषात्मना भिद्यमानोऽपि व्याप्त्यादि-संबन्धान्तरभावमनुभवतीति।

* यत्र—वृद्धव्यवहाराद्व्युत्पत्तिस्थले.

१. बोधनं कर्तृ संबन्धान्तरसापेक्षं लिङ्गादिकं अस्मात्—शब्दप्रमाणात् व्यावर्तयति।

अस्तु तावदेवं सिद्धे व्युत्पत्तिः। कार्येऽपि व्युत्पत्तिर्दुरपह्नवा। अतश्शेषपूरणेन कार्यान्वितस्वार्थपरतैव शब्दस्य फलिष्यतीति चेन्नैतदेवम्। यतः—

अर्थानां व्यभिचारित्वादवाच्यत्वं प्रतीयते।
न तु संसर्गमात्रेण वाच्यता प्रतिपाद्यते॥

अस्तुवा कार्यस्य सर्वत्राव्यभिचारः। दृष्टोदाहारणमात्रेषु ह्यव्यभिचारो वर्णनीयः नतु प्रयोक्ष्यमाणेषु। शब्दशक्तिनिश्चयानुसारेण यथारुचि प्रयोगानुपपत्तेः (प्रयोगोपपत्तेः ?)। तन्निश्चयश्च न प्रतियोगिगोचरः स्वार्थस्यैव विशिष्टस्याभिधेयत्वात्। प्रतिसंबन्धिनस्तु पदान्तरस्मारितस्य अनेनाभिधानानभ्युपगमात्। अभ्युपगमेवा पर्यायत्वप्रसंगात्।—

यस्यह्युपाधिशब्दे····[न ना]भिधेयं विशेषणम्।
कथं तर्ह्यभिधेय····[न्त]दभिधानान्तरास्पदम्॥

न चाव्याभिचारित्वात् वाच्यत्वं। घटादिशब्दस्य सत्तादिवा····[चकत्वप्रसङ्गात्]। प्राधान्यमपि वाक्यार्थ····[रूपतामेव संपा]दयति नाभिधेयताम्। अप्रधानानामप्यभिधेयत्वाभ्युपगमात्। अतश्शुक्लः पटो भवतीत्येवमादेः कार्यान्वितस्वार्थाभिधाने न किञ्चिन्निबन्धनमस्ति।

यत्तु शब्दचेष्टयोस्समानयोगक्षेमत्वादेकजातीयप्रमाणत्वप्रसङ्ग इति। तत्र वदामः—

बोधकत्वं विना शब्दे नास्ति संबन्धकल्पना।
भावभेदप्रयुक्ता तु चेष्टा तस्यानुमापिका॥

किञ्च—

संहत्यैव प्रमाणत्वं शब्दस्यान्वयबोधनात्।
पुंसां चेष्टा पुनर्व्यस्ता विशिष्टमनुमापयेत्॥

आत्मनि[1] विशिष्टबुद्धिं दृष्ट्वा प्रत्येकं व्युत्पादितानां प्रयोज्यवृद्धज्ञानोत्पत्तिमनुमाय व्यवहारेवा संबन्धावधारणमिति न क्वचिदपि बोध्यबोधकभावातिरिक्तसंबन्धान्तरसिद्धि-

---

१. इदमङ्गुलिनिर्देशस्थलविषयकम्।

शशब्दार्थयोरित्यनुमानवैधर्म्यमत्यन्तप्रसिद्धमेव । चेष्टा पुनश्चेष्टमानपुरुषविज्ञानहेतुरनुमानमेवेत्यवसीयते । तथाहि—

काश्चिद्भावविशेषस्य कार्यत्वेनैव संस्थिताः ।
सङ्केतसिद्धिकार्यार्थाः काश्चिच्चेत्यनुमापिकाः ॥

ननु च शब्दवत्प्रयोजकवृद्धसमचेष्टतश्चेष्टा (समवेतचेष्टा?) समष्टिप्रेरितप्रयोज्यवृद्धप्रवृत्तिदर्शनाद्विशिष्टज्ञानानुमानपूर्वकं व्युत्पत्तिस्स्याच्चेत (स्यादितिचेत्?)।[2]

स्यादेवं यदि तत्[3]पूर्वं चेष्टाव्युत्पत्तिरिष्यते ।
क्वचित्प्रागनुमानत्वे सिद्धे तत्रापि सा गतिः ॥

न चैवं सङ्केतितडित्थादिशब्दानामन्येषांवा व्यस्तानां प्रथमं संबन्धग्रहणोपपत्तिः। यद्यपि पदार्थानां प्रत्येकप्रमाणप्रतिपन्नानां पारिशेष्यलिङ्गानवगतसाहित्यानां स्वसंसर्ग प्रतिपादनासामर्थ्यनिश्चयः । शब्दवद्वा संसर्गगोचरतया चेष्टानां न व्युत्पत्तिः । तथापि पक्षधर्मतावशेन विशिष्टज्ञानमिति विवेक्तव्यम् । प्रत्येकं हि चेष्टास्स्वात्मदृष्टव्याप्तिबलाः परत्रापि तत्तद्बुद्धिसिद्ध····[स्वरूपा] स्तामेव विशेषतोऽनुमापयन्ति । स्वयं हि कस्यचिदानयनार्थमाकुञ्चनं करोति । निरसनाय प्रसारणं, अभ्यनुज्ञानार्थं मुखं प्रयच्छति, विवादे स्वाभिमुख्यं निवर्तयन् तिर्यक् प्रेरयति । एवमादि तत्तत्कर्म तत्तदभिप्रायपूर्वकमिति व्याप्तं विशेषाभिमुख्येन पक्षधर्मतालाभात्तद्विशेषगोचरतया चेष्टायां चेष्टान्तरनिरपेक्षमनुमानत्वं सिध्यति । नैवं शब्दस्य कस्यचिच्छब्दान्तरनिरपेक्षस्य विशिष्टगोचरतयानुमानत्वमवकल्पते ।

---

१. बहुव्रीहिरयम् । भावभेदप्रयुक्तेत्यंशस्य विवरणम् ।

२. अयं भावः। यथा गामानयेति प्रयोजकेनोक्तौ प्रयोज्ये विशिष्टज्ञानं तद्वाक्यजन्यं तदीयप्रवृत्त्या अनुमाय तद्वाक्यस्य विशिष्टार्थबोधकत्वं व्युत्पित्सुः प्रत्येति, एवं शब्दोच्चारणं विना गवानयनरूपार्थज्ञापकानेकहस्तचेष्टामात्रसद्भावस्थले पूर्ववत् व्युत्पित्सोः प्रयोज्यवृद्धगतप्रवृत्त्या प्रयोजकगतचेष्टासमुदायजन्यविशिष्टज्ञानानुमानसंभवेन चेष्टानामपि तादृशविशिष्टार्थबोधकत्वं संभवतीति शब्दवत्प्रमाणत्वमिति नानुमानत्वसंभवस्तासामिति ।

३. तत्पूर्वं-इदंप्रथममित्यर्थः । अयं भावः—अन्यत्र एकस्या अपि चेष्टायाः भावभेदप्रयोज्यत्वेन तदनुमापकतया अनुमानत्वे सिद्धे तदनुरोधेनोक्तानेकचेष्टास्थलेऽपि तासामनुमानत्वमेव युक्तम् । बोध्यबोधकभावातिरिक्तेन कार्यकारणभावसंबन्धेन ज्ञानसाधनत्वाच्च । शब्दविषये तु नैवमनुमानत्वं शक्यं वक्तुम् तस्य प्रत्येकं विशिष्टज्ञापकत्वानङ्गीकारात् । कार्यकारणभावादिसंबन्धान्तरपरिहारेण वाच्यवाचकभावसंबन्धेनैव ज्ञानजनकत्वाच्चेति ।

न च चेष्टान्तरत्वं स्यादाभिमुख्याहिसङ्गते । (आभिमुख्याभिसङ्गतेः ?) ।
एकस्या एव यद्रूपमाभिमुख्याद्विना न तत् ॥

याश्च स्थूलकृशवृत्तचतुरश्रह्रस्वदीर्घादिप्रभेदवस्तुज्ञापनाय प्रवृत्ताश्चेष्टाः ताश्च तत्तद्वस्तुस्थितियोग्याकाशप्रदेशपरिच्छेदाकारेण तत्तद्बुद्धिमुत्पादयन्तीति नात्रापि शक्त्यन्तरकल्पनावकाशः ।

तत्तद्वस्त्वात्मनात्मानमात्मीयं वापि किञ्चन ।
भावयन्ति क्वचित्तत्र नातिक्लेशो भविष्यति ॥

यत्र वा कश्चित्सर्वप्रकारस्संबन्धो न दृश्यते तत्र शुद्धज्ञापकप्रतिरूपकल्पना मूलमिति विवेक्तव्यम् । अत एव लिपेरक्षरप्रतिपत्तिर्व्याख्याता । तत्र च

सङ्केतमात्रसिद्धैव व्याप्यव्यापककल्पना ।
आनन्तर्यविशेषेण पक्षधर्मत्वसंभवः ॥

अत एव हि तत्र प्रत्येकमेव संबन्धग्रहणान्न समुदायापेक्षा । शक्यते हि केनचित्प्रकारेण किञ्चित्कस्यचिद्व्यापकमिति सिद्धे पुरुषेणापि तत्प्रकारस्यापरत्र व्यवहारार्थमारोपणम् । तदभिप्रायानुसारिभिश्चापरैर्व्यवहारः प्रतीयते । यद्यपि तस्याभिप्रायमपि चिरनिर्वृत्तं संबन्धमूलतया नोपदिशन्ति तथापि तद्गोचरमात्रोपदेशाद्व्यवहारस्संपद्यते । एवमेव भाषान्तराणामपि व्यवहारः । तत्र तु—

अनुमानप्रकारस्तु लिप्यादौ परिकल्प्यते ।
भाषान्तरे पुनः कल्प्या भवेच्छब्दप्रमाणता ॥

न हि तत्र प्रत्येकस्यैव पदस्यार्थप्रतिबोधनमुपलभ्यते । पक्षधर्मतालभ्यविशेषाभावात्पूर्वानुभूतस्मृतिमात्रे चाननुमानत्वात् साक्षात्प्रमाणीभूतशब्दप्रकारेण बोधकत्वदर्शनाच्च ।

शब्दः खलु विशिष्टार्थं संसृष्टः प्रतिपादयन् ।
अन्वयव्यतिरेकाभ्यामंशे निष्कर्षमृच्छति ॥[1]
तथा गृहीतसंबन्धः परस्ताद्व्यवहारकृत् ।
व्याप्यत्वपक्षधर्मत्वमाना (पक्षधर्मत्वाभावा ?) द्भिन्नोनुमानतः ॥[2]

---

१. इदं गामानयेत्यादिव्यवहारपूर्वकव्युत्पत्त्यभिप्रायम् ।
२. इदंप्रथमतएव अम्बातातमातुलादिशब्दव्युत्पत्त्यभिप्रायम् ।

स हि न तावद्वाक्यात्मना अनुमानम्। वाक्यार्थव्याप्त्यभावात्। तस्य च न वाक्यार्थसमानाधिकरणतया पक्षधर्मत्वप्रतिपत्तिसंभवः। नापि पदात्मना। तस्यापि पदार्थेन संबन्धान्तरादर्शनात्। ज्ञाप्यज्ञापनसंबन्धस्य व्याप्तिफलत्वात्तदनन्तरभावित्वेन तस्यैव तद्भावानुपपत्तेः। न च पदमात्रस्यानुमात्वमनधिकविषयत्वादित्युक्तम्। नापि पदान्तरसंसृष्टवेषेणानुमानत्वम्। अवाक्यत्वात्। नापि वाक्यस्थानां पदानां संसर्गविशेष-बोधकतयानुमानत्वम्। परस्परसमभिव्याहारानुग्रहापेक्षत्वादभिधानस्यानुमानेऽनुमानान्तरानपेक्षत्वात्। अतो विलक्षणेनैव रूपेण शब्दस्य बोधकत्वम्। तच्च रूपं स्वाभाविक-शक्तिशालिषु केषुचित् स्वतस्सिद्धम्। अन्येष्वारोपितं व्यवहाराय घटिष्यते

न[1] तावत्सर्वशब्देन स्वतश्शब्दः प्रतीयते।
अन्यथासिद्धिदोषेण क्वचिद्येन न कल्प्यते॥
तथा यः कश्चिदेकस्य सञ्ज्ञेति परिभाष्यते।

न खल्वनिदंप्रथमव्यवहारहेतुभावेषु सङ्केतकरणसंभावनावकाशः। ते च के शब्दा इति चिन्तायामुच्यते।

येषां स्मृतिप्रवाहेण परिपालितवर्ष्मणाम्।
योग्यापि नेष्यते सृष्टिः (योग्योऽपि नेक्ष्यते स्रष्टा?) तेषामेव ह्यनादिता॥[2]
ननु पालनभिन्नत्वादस्मृतिः कर्तुरुच्यते।
न चानपेक्षितस्स्मर्तुं यद्येषामेष विद्यते॥
(न हि पालनहीनत्वादस्मृतिः कर्तुरुच्यते।
न चानपेक्षितः कर्ता यद्येषामेष विद्यते?॥)

---

१. न तावत्सर्वशब्देषु शक्तिः साङ्केतिकी भवेत्।

उपाधेरपरिज्ञानात्स्वतश्शक्तिः प्रतीयते॥ इति स्यादिति केचित्। प्रकरणमिदं सर्वेषामपि शब्दानां पुरुषसङ्केतरूपैव शक्तिः न क्वचित्स्वतस्सिद्धा इति वदन्तं तार्किकंप्रति प्रवृत्तमिति ज्ञेयम्॥

२. येषां शब्दानां स्मृतिप्रवाहेणास्खालित्येन रक्षणमुपलभ्यतेऽवश्यापेक्षितश्च कर्ता भवति, परन्तु स न विज्ञायते तेषां शब्दानां कर्तुरभावादेवाविज्ञानमित्याश्रयणीयमिति नित्यत्व-सिद्धिः। येषां पुनः तथाविधपरिरक्षणाभावः कर्तुरनपेक्षावा तेषां कर्तृसत्वेपि तदविज्ञानं तयोरन्य-तरेणैवोपपन्नमिति सकर्तृकत्वाविरोधादनित्यत्वमिति प्रघट्टकार्थः।

संबन्धे तदनि····[त्यत्वात्प्रयोक्तुः] स्यादपेक्षणम् ।
सन्दर्भे वानपेक्षायां संबन्धे ध्रुवमर्दनम् ॥

तथाहि एके तावत् भाषाशब्दसमभिव्याहारेणार्थं बुभुत्समानाः पुरुषाधीनप्रयोगेषु···· [पदेषुश]क्तिसद्भावतत्समारोपणयोः कामकृतादरास्ततत्समुदायरूपवाक्यप्रयोक्तुः पुरुषस्य प्रत्ययितव्यत्वमेव केवलमनुसृत्य तदधीनार्थनिश्चयलाभाद्व्यवहारफलं लभन्ताम् ।

यत्र तु न पुरुषाधीनता वाक्यप्रयोगस्य विज्ञायते । तत्र चेत्पदेषु न स्वाभाविकवाचकशक्तिः, (अपितु) पुरुषसङ्केतमात्रादेव बोधकता । तदा पुरुषा (पुरुषो ?) नपेक्षनित्यवाक्यानुकूल्येनवा पदेषु बोधकत्वं समकल्पयत् उत स्वातन्त्र्येणेति विवेकाभावे कथमिव तद्वाक्यार्थस्य निश्शङ्कमशेषपरीक्षकोपादानमित्यवश्यविज्ञेयता सङ्केतकर्तुः । तस्य हि प्रमाणान्तरेण तद्वाक्यार्थमनुसन्धाय तदेकदेशभूतपदार्थेषु तद्वाक्यैकदेशानां पदानां बोधकत्वं व्यवस्थापयतः किञ्चिन्मात्रान्यथाभावेऽपि विशिष्टवाक्यार्थसिद्धेरतिवादानुविधेय (सिद्धिरिति नानुविधेय ?) प्रज्ञत्वं विज्ञायते ॥

अतो वाक्यप्रयोक्तुर्वा सङ्केतयितुरेव वा ।
सद्भावे तदविज्ञातुर्वाक्यार्थे निश्चयः कथम् ॥
महर्षयश्च धर्मिष्ठाः कृतज्ञाः सत्यवादिनः ।
पतञ्जलिमुखास्सन्तः निषेधन्तीति (निषेधन्त्यति ?) साहसम् ॥
शब्दार्थव्यवहारश्च कश्चिद्यत्रानुवर्तते ।
प्रक्रियान्तरमाश्रित्य तदान्यकरणं भवेत् ॥
यदा तु सर्व एवायं व्यवहारो न दृश्यते ।
तदा केन प्रकारेण सङ्केतकरणं भवेत् ॥
स्मृत्याधायकमात्रस्य ह्यन्वितार्थावबोधिता ।
न च शब्दादृते क्वापि दृष्टपूर्वा कथञ्चन ॥
फलशब्दं च नाज्ञात्वा (मूलशब्दमविज्ञाय ?) सङ्केतं कः प्रकल्पयेत् ।
नाचाक्रुत्वैव सङ्केतं फैलवत्तां सहिष्यते (भजिष्यते ?) ॥

---

१. संबन्धे तदनित्यत्वे संबन्धुस्स्यादपेक्षणम् ।
संदर्भे वानपेक्षायां संबन्धुर्ध्रुवमर्दनम् ॥
इति भवितव्यमिति केचित् ।

२. फलमत्रान्वितार्थाभिधायित्वरूपं बोधकत्वम् ।

न च स्मृतिसमर्थत्वसिद्ध्यै सङ्केतकल्पना ।
येन केनापि योगेन तत्सामर्थ्यस्य दर्शनात् ॥
नचास्मारकमादाय कश्चित्संव्यवहारयेत् ।
अर्थेनापि तथात्वेन व्यवहारप्रसङ्गतः ॥

अतो विश्वशब्दव्यवहारसङ्कथाशून्ये जगति अर्वाचीनेन तावच्छब्दप्रमाणप्रथमप्रवृत्त्यर्थसङ्केतकल्पनानवकाशः । ईश्वरस्तु वेदवच्छब्दव्यवहारमपि यथापूर्वमकल्पयदिति न्यायेन स्वातन्त्र्येण प्रवर्तयति ।

स हि शक्त्यनुसारेण तेषामेव प्रवर्तयन् ।
नासमर्थरदाख्यानस्वातन्त्र्यमधिगच्छति ॥
यथान्यः पुरुषः कर्ता योग्यादृष्टेर्निवारितः ।
तथा वारितमीशस्याप्ययथापूर्वकल्पनम् ॥
वर्णानां शक्तियुक्तानां क्रमानुग्रहकांक्षिणाम् ।
नित्यः क्रमविशेषोऽपि व्यञ्जको व्यवतिष्ठते ।
तस्य येत्वन्यथाभावं कुर्युर्भाषान्तरादिषु ।
प्रकृतिप्रत्ययान्यत्वपरिभाषादिहेतुभिः ॥
तत्रापि पुरुषाधीनं प्रमाणान्तरकारितम् ।
याथात्म्य (याथार्थ्य ?)मिति विज्ञेयमाभासत्वे (त्वं ?) स्वरूपतः ॥
न ह्याभासस्य प्रतीतिहेतुत्वमेव निवर्तते । किन्तु प्रमितिहेतुत्वमेव ।
अज्ञानकरणे (कारणा ?) तत्वमारोपितमकार्यकृत् ।
तज्ज्ञाने कारणे (तज्ज्ञानकारण ?) भ्रान्तिः कार्यं सूते भ्रमान्तरम् ॥[1]
प्रतिबद्धभ्रमेणेव प्रतिबन्धकवेदनम् ।
वाचकत्वभ्रमेणैव वाच्यज्ञानं प्रवर्तते ॥
वाचकत्वभ्रमश्चापि पुंसां सङ्केतकल्पितात् ।
प्रमाणान्तरसंवादान्नयाति सहसा लयम् ॥

---

१. आरोपविषयीभूतं ज्ञानकारणभिन्नं घटादिरूपं चेत् तत् भ्रमान्तररूपं कार्यं न जनयति । तस्य तत्स्वभावविरहात् । तज्ज्ञानकारणभ्रान्तिः, तत् ज्ञानकारणं धूमादिरूपं चेत् कार्यं भ्रमान्तरं जनयति । तस्य तत्स्वभाववत्वादित्यर्थः ।

प्रमाणान्तरसिद्धेषु तत्तदर्थेषु सूरयः ।
यथायथं प्रयुञ्जानाश्शब्दान्संवादयन्ति हि ॥
विसंवादोऽपि भूयिष्ठो यश्शब्देषूपलभ्यते ।
सच संबन्धसंदर्भसाधारण्येन नीयते ॥

न हि संदर्भदोषेण जायमानो विसंवादस्संबन्धाध्यासजनिताद्विलक्षणएवेत्यस्ति प्रमाणम् । तत्र शब्दाभासानामपि यादृच्छिकसंवादिलिङ्गाभासानामिव प्रमाणान्तरेण संवादोपलंभात्तत्प्रत्ययानुसारिभिर्व्यवहारोऽभङ्गुर एव प्रवर्त (र्त्य?) ते । न च कश्चिदपि शब्दार्थ इत्येव लोके विश्वसिति अपित्वाप्तोक्तिरित्येव । तत्र वक्तृज्ञानानुमानद्वारेणवा तन्मूलप्रमाणान्तरानुसारेणवा प्रत्यय इति लोकव्यवहारस्थितिः । वेदेतु—

प्रत्यक्षवत्स्वशक्त्यैव शब्दोऽर्थं प्रतिपादयन् ।
न केनापि प्रमाणेन विसंवादं प्रपद्यते ॥
न हि तत्राप्तविज्ञानं नचमानान्तरोद्भवः ।
निश्चयार्थं नैर्मृग्यः स्वतःप्रामाण्यसिद्धितः ॥
येषां शब्दस्य मानत्वं⋯⋯[तुल्यव] र्णं प्रमान्तरैः ।
तेषां स्वातन्त्र्यमेष्टव्यं नित्यत्वेनैव नान्यथा ॥[1]
न प्रमाणान्तरप्राप्ते प्रमाणान्तरकल्पना ।
य (त?)दा प्राप्तप्रमाणत्वं वक्तृमानानुसारि तु ।

ननु च—

सामान्येनाप्तता यस्य पुंसस्सिद्धाप्रमाणतः ।
तद्वाक्यात्स्वार्थभेदेषु प्रमाणं किं न कल्प्यते ॥

नैतदेवं⋯ [य]तः

प्रतिवाक्यं हि वक्तृणामाप्तत्वमवगम्यते ।
विप्रलम्भादनाप्तत्वे (न विप्रलम्भनादाप्तो?) न तन्मात्रोक्तिसत्यता ।

१. अयमर्थः—वेदस्य प्रमाणान्तरतुल्यं अनधिगतार्थावबोधकत्वरूपं प्रामाण्यं नित्यत्व एव सिध्यति न पौरुषेयत्वे । तथा सत्यर्थं बुध्वा शब्दरचनेति न्यायेन पुरुषाधिगतार्थावबोधकत्वस्यैव सिद्ध्या तद्व्याघातादिति ।

न चानुमानादिकस्य सिद्धिरस्तीति वक्ष्यते ।
न तत्ज्ञानेन (ज्ञानेऽस्ति?) सत्यत्वं स्वतः प्रामाण्यवर्जने ॥
स्वतः प्रामाण्यमेष्टव्यं शब्दप्रामाण्यवादिभिः ।
तच्चापि शब्दनित्यत्वद्वारेति परिनिष्ठितम् ॥

येचे[1]ऽन्विताभिधानं नेच्छन्ति तेषामपि शब्दप्रामाण्यासिद्धिः ।

विशिष्टज्ञान[2]हेतुत्वातिरेकेण चेष्टानुमानसाधर्म्यातिक्रममार्गस्य दुर्लभत्वात् । तत्साधर्म्ये च तस्यापि शब्दवत्प्रमाणान्तरत्व-मिच्छतां प्रागुक्त एव परिहारो द्रष्टव्यः ॥

इति भगवद्रामानुजमुनिवरमतधुरंधरस्यात्रिगोत्रप्रदीपश्रीपद्मना-
भार्यनन्दनस्य वादिहंसनवाम्बुदस्य श्रीमद्रामानुजाचार्यस्य
कृतिषु न्यायकुलिशे सिद्धार्थव्युत्पत्ति
समर्थनवादः प्रथमः ॥

---

१. वेदपौरुषेयत्ववादिमते शब्दप्रामाण्यासिद्धिमुपपाद्य तदपौरुषेयत्ववादेऽप्यन्विताभिधानानादरेणाभिहितान्वयाङ्गीकारे शब्दस्य प्रामाण्यं न सिध्यतीत्युपपादयति येचेत्यादिना ।

२. विशिष्टज्ञानहेतुत्वं—परस्परान्वितार्थविषकज्ञानहेतुत्वम् ॥

SIDDHITRAYA

BY

Yāmunācārya

Edited with English Translation and Notes

BY

R. RAMANUJACHARI

AND

K. SRINIVASACHARIAR

॥ श्रीः ॥

सिद्धित्रयम्

आत्मसिद्धिः

१. प्रकृतिपुरुषकालव्यक्तमुक्ता यदिच्छा-
मनुविदधति नित्यं नित्यसिद्धैरनेकैः ।
स्वपरिचरणभोगैः श्रीमति प्रीयमाणे
भवतु मम परस्मिन्पूरुषे भक्तिभूमा ॥ १ ॥

विरुद्धमतयोऽनेकास्सन्त्यात्मपरमात्मनोः ।
अतस्तत्परिशुद्ध्यर्थमात्मसिद्धिर्विधीयते ॥ २ ॥

1. May I have the highest bhakti to that Supreme Puruṣa to whose will matter (prakṛti)[1], bound souls (puruṣa)[2], time, manifest material nature, released souls and innumerable eternally perfect souls always conform, to that Śrīmān,[3] who is ever in bliss along with many eternally perfect souls, whose sole enjoyment is in rendering service to Him. There are many conflicting views concerning the finite self and the Infinite Self. With a view to making the matter clear, the determination of the real nature of the soul is (here) undertaken.

---

1. Prakṛti is the primordial source of the material universe. In the state of pralaya (dissolution) it is known as avyakta (the unmanifest); in the state of sarga (evolution) it is called vyakta (the manifest).

2. Viśiṣṭādvaitism recognises three classes of jīvas—baddha (the bound), mukta (the liberated), and nitya (the ever perfect). Jainism accepts a similar classification.

3. As the prayer is for highest form of bhakti to Śrīmān, it is evident that Yāmunācārya considers the Lord Nārāyaṇa along with Lakṣmī the means of salvation, even as He, in conjunction with her, is the supreme goal.

२. सम्मतं हि सर्वसमयेषु आत्मज्ञानं निश्रेयसहेतुरिति, श्रूयते च—पृथगात्मानं प्रेरितारञ्च मत्वा जुष्टस्ततस्तेनामृतत्वमेति, आत्मानं चेद्विजानीयात्, तरति शोकमात्मवित्, ब्रह्मविदाप्नोति परम्,—इत्यादिः परावरात्मतत्त्वज्ञानस्यापवर्गसाधनत्वं प्रतिपादयन् वेदान्तवाक्यगणः; तत्रास्मिन्नात्मनि परस्मिंश्चानेकविधा विप्रतिपत्तयस्तीर्थकराणाम्; तद्यथा आत्मविषये तावत् देहमेव केचिदात्मानमाचक्षते, इन्द्रियाण्यन्ये, मन इत्यन्ये, प्राणमपरे, अध्यस्तज्ञातृभावमनहंकारं बोधमात्रमितरे, देहेन्द्रियमनःप्राणबोधविलक्षणमाकाशादिवदचित्स्वभावमागन्तुकबोधसुखदुःखाद्यसाधारणगुणाधारमहंकारगोचरमपरे, अपरे तु बोधैकस्वभावमेव स्वभावधवलमिव स्फटिकमणिमुपधानविशेषापादितारुणिमगुणादिनिर्भासमन्तःकरणोपधानापादितरागद्वेषसुखदुःखाद्यशिवगुणनिर्भासमनुदितानस्तमितस्वरूप-

2. That the knowledge of the self is the means of attaining transcendental felicity is indeed admitted in all systems. "On knowing the finite self and the Supreme Controller to be different, and thereby becoming the object of His Grace, he attains immortality";[4] "If one should know the self"; "The knower of the self crosses over sorrow";[5] "He who knows Brahman attains the Highest"[6]—these and other texts of the Upaniṣads are found, which declare that the knowledge of the finite self and the Supreme Self is the means of liberation. Eminent teachers hold many conflicting views concerning the finite self and the Highest Person.

With regard to the individual self, some maintain that the body itself is the soul[7]; others that it is the senses; others that it is mind (manas); others that it is vital breath (prāṇa); still others that it is pure consciousness, which is erroneously supposed to possess the quality of being a knower and which does not appear as the 'I'[8]; others that it is different from the body, the senses, mind, vital-breath and consciousness and that, like ether and the like, it has a non-intelligent nature; and that it is the substratum of knowledge, pleasure, pain and other adventitious and special qualities, and that it is the object of self-consciousness.[9] Others again say that it is of the nature of pure consciousness itself, which appears to possess inauspicious qualities, such as love, hate, pleasure, pain, etc., produced by the limiting condition of the internal organ, even as a crystal that is in itself white appears to

4. Śvet. Up. I. 6.
5. Chand. Up.
6. Tait. Up.
7. Cārvāka doctrine.
8. Advaita Vedānta.
9. Nyāya-Vaiśeṣika.

प्रकाशं स्वयंज्योतिषमिममभिदधति, अन्ये तु ज्ञानानन्दस्वभावम्, आश्रयानुकूल्यप्रतिलब्धानन्दसुखादिव्यपदेशबोधविशेष एवास्य स्वाभाविक इत्यन्ये ।

३. तथा अनुमानसमधिगम्यः, आगमैकवेद्यः, मानसप्रत्यक्षवेद्यः, ग्राहकतयैव सकलविषयवित्तिषु प्रत्यक्षो ज्ञानस्वभावतयानुदितानस्तमितस्वरूपप्रकाशः स्वयं ज्योतिः, ईदृशोऽप्यागमानुमानयोगजप्रत्यक्षैः स्वेतरसकलविलक्षणस्वाभाव्येन विशदविशदतरविशदतमतया अन्ततो यथावदपरोक्ष्यत इति ।

४. तथा परममहान्, अणुपरिमाणः, शरीरपरिमाणः, स्वतः परिमाणरहितोऽपि व्याप्यवस्तुपरिमितिकृतपरिच्छेद इति, व्याप्तिरपि चैतन्यमात्रेण स्वरूपेण इति ।

possess redness and other qualities imparted to it by certain specific limiting conditions (say, an adjacent red flower); and that the luminosity of its being is neither born nor destroyed; and that it is self-luminous.[10] Others again hold that it has the nature of knowledge and bliss; still others that its nature is of that knowledge which on account of its agreeableness to its possessor, acquires the name of bliss and pleasure.

3. Similarly (with regard to the means of knowledge by which it is established, divergent views have been offered, such as that) it can be known through inference[11]; that (it) can be known only through scripture; that (it) can be known through mental perception[12]; that (it) is directly known only as the knower in all cognition of objects[13]; that, as it possesses the nature of knowledge, its luminosity is neither born nor destroyed and that it is self-luminous. Though possessed of this nature (though self-luminous), with the aid of scripture, inference, and yogic perception, it is directly perceived in its true nature as having a character different from everything other than itself, (first) clearly, (then) more clearly, and finally most clearly and immediately.

4. Similarly (with regard to its size, the rival views are that) it is infinitely big; that (it is) atomic in size; that (it is) of the same size as the body; that though in itself devoid of magnitude, it is limited to the size of the body pervaded by it. Concerning the manner of its pervasion also, (the different theories are) that it pervades only by its intelligence and that it pervades by itself.

---

10. Sāṅkhya.
11. Sāṅkhya.
12. Mīmāmsā.
13. Prābhākara school of Mīmāmsā.

५. तथा क्षणिकः यावच्छरीरोष्मस्थायी, आप्राकृतप्रळयावस्थायी, आमोक्षस्थायी, कूटस्थो नित्य इति ।

६. सर्वशरीरेष्वेकः, प्रतिक्षेत्रं नानाभूत इति च, तथातथा प्रतिपद्यन्ते ।

७. तथा परमात्मविषयेऽपि केचित्समस्तवस्तुसाक्षात्कारिणं सर्वशक्तिमीश्वरमेव नाभ्युपगच्छन्ति । अभ्युपगच्छन्तोऽप्येके प्रत्यस्तमितमितिमानमातृमेयेश्वरेशितव्यादि-भेदविकल्पकूटस्थविज्ञानैकरसमनाद्यविद्योपदर्शितवियदादिभेदावच्छिन्नज्ञानैश्वर्यादिमहिम-विकल्पतया काल्पनिकमाचक्षते ।

अपरे तु यथोक्तस्वरूपमेव अविद्योपधानेन तद्गुणसारतया प्रकल्पितब्रह्मादि-स्थावरपर्यन्तविविधजीवभेदं स्वाधीनविचित्रविवर्तस्वभावमायोपहिततया समासादित-

5. Similarly (with regard to its duration, it has been stated that) it is momentary; that it endures as long as the bodily heat lasts; that it exists till the material world is dissolved; that it lasts till mokṣa is attained; that it is unchanging and eternal.

6. Similarly (with regard to its number), it is maintained that it is one and the same in all bodies[14]; and that it is different in each body.

7. So also about the Infinite Self, some do not at all admit an Īśvara (God) who directly perceives all things and who is all-powerful. Some, while admitting a God, maintain that he is of the essence of pure consciousness, which is unchanging and which is devoid of the distinctions of knowledge, means of knowledge, knower, and the known, the ruler and the ruled and so on. (They hold that) on account of beginningless avidyā, he is erroneously imagined to possess knowledge of manifoldness, such as ākāśa, and greatness such as sovereignty.[15]

Others, while accepting this characterisation (of the Supreme Self as being of the nature of pure consciousness), state that it is subject to limiting conditions, and that, in association with the limiting condition of avidyā, for the reason of its having avidyā for its essence, it is taken to possess manifold distinctions of jīvas commencing from Brahmā and ending with immovable things; and that, in conjunction with māyā, which is under its control and which assumes diverse wonderful changes,

---

14. One variety of Ekajīvavāda holds that there is one jīva residing in each of the many bodies.

15. Advaita—ekajīvavāda and also nānājīvavāda where Īśvara too is a reflection. cf. Pañcadaśī. Ch. X.

सार्वज्ञ्यादिसंपदमुपहितमिममभिदधति । तथान्ये प्रकृष्टसत्त्वोपादाननिमित्तस्वतन्त्रप्रधानपरिणामविशेषमात्रनियमनिर्वाहितसर्वैश्वर्यमर्यादमाद्रियन्ते । अनुपहितमपि परिणामिनमपरे प्रतिपेदिरे । अपरिणामिनमपि स्वमायांशभूतविचित्रान्तःकरणदर्पणतलप्रतिबिम्बिततया प्रतिपन्नविश्वतैजसप्राज्ञभावं तमेकमेव चेतनमितरे रोचयन्ते । अन्ये तु स्वाधीनत्रिविधचेतनाचेतनस्वरूपस्थितिप्रवृत्तिभेदं स्वाभाविकनिरवधिकातिशयज्ञानबलैश्वर्यवीर्यशक्तितेजःप्रभृतिसकलकल्याणगुणमहार्णवं पुरुषविशेषमीश्वरमातिष्ठन्ते ।

८. तथा तद्विशेषेऽपि हरिहरविरिञ्चिभास्करात्मनाऽनभिमततत्तन्मूर्तिपरित्यागेन च चतुस्त्रिद्व्येकमूर्तितया विवदन्ते । मूर्तिविशेषविषयाश्च नित्यत्वानित्यत्वभौतिकत्वा-

it acquires omniscience and other glorious qualities.[16] Similarly, others uphold the view that God possesses universal Lordship which is invariably and exclusively maintained for Him by the modification of independent pradhāna. This modification has for its cause the fact of pradhāna possessing the quality of sattva *par excellence*.[17] Others assert that although He is free from limiting conditions, He is yet subject to modification. Others favour the view that although He does not undergo modifications, yet, on account of being reflected by the reflecting media of the diverse internal organs which are aspects of His own māyā, this intelligent being who is one only acquires the forms of Viśva, Taijasa and Prājña.[18] Others hold that the Lord is that Supreme Person who has under His control the diverse forms of essence, existence and the activities of the threefold jīvas and non-intelligent objects, and who is the great ocean of all auspicious qualities, such as jñāna, bala, aiśvarya, vīrya, śakti, tejas,[19] and others which are natural to Him, invariable and unrivalled in excellence.

8. Similarly, even in regard to His particular manifestations, some contend that He has the four forms of Viṣṇu, Śiva, Brahmā and the God of the Sun; others hold that His form is threefold or twofold or single, after eliminating those forms which are unacceptable to them. Concerning the individual manifestations (of God) doubts have been

16. Nānājīvavāda, on the view that Īśvara is the prototype not a reflection.
17. Yoga.
18. Advaita where Īśvara is the prototype.
19. ज्ञानमिह सर्वसाक्षात्काररूपम् *cf.* यो वेत्ति युगपत्सर्वं प्रत्यक्षेण सदा स्वतः । बलं नाम श्रमप्रसङ्गरहितं सर्वधारणसामर्थ्यम् । ऐश्वर्यं नाम अव्याहतेच्छं सर्वनियन्तृत्वम् । वीर्यम्=सर्वोपादानत्वे सर्वधारणे सर्वनियमनेऽपि विकाररहितत्वम् । शक्तिः=स्वेतरसर्वनिर्वाहिका सर्वोपादनत्वात्मिका. यद्वा यदन्यैरशक्यत्वादघटितमिव भाति तद्घटनसामर्थ्यरूपा । तेजः=अस्वाधीनसहकार्यनपेक्षत्वम्; पराभिभवनसामर्थ्यं तेजः केचित्प्रचक्षते ॥

भौतिकत्वस्वार्थपरार्थत्वादिवितर्काः प्रादुर्भवन्ति, परिजनस्थानादिगोचराश्च ।

९. तथा प्रमाणतोऽपि आनुश्रविक एवेत्येके । आनुमानिकश्चेत्यन्ये । विशिष्ट-प्रत्यक्षसमधिगम्यश्चेत्यपरे ।

१०. तथा आत्मपरमात्मनोः संबन्धेऽपि अनाद्यविद्योपादानभेदास्पदोऽयमीश्वरेशितव्यादिरूपः संबन्धः परमार्थतस्त्वेकं तत्त्वमिति केचित् । व्यतिरेकाभावेऽप्यतिरिक्तो जीव इत्यन्ये । स्वतस्त्वैक्यमुपाधितो भेद इति विशिष्टस्वरूपभावेन भिन्नाभिन्नत्वमितरे । नानात्वे सत्येव अभेदो नामान्वयः अंशांशिभावलक्षणः समवायः, परतन्त्रतालक्षणः शेषशेषित्वरूपः, स्वस्वामिभावः भृत्यस्वामिलक्षण इति च नानाविधा वादाः ।

raised about their being eternal or non-eternal, elemental or non-elemental, whether they exist for their own sake or for the sake of others, and doubts too have arisen concerning their attendants, place of residence, etc.

9. Similarly, with regard to the means of knowledge some hold that He is known from the Vedas alone ; [20] others that he is established by inference,[21] others that He is also cognised by extraordinary perceptions.

10. Similarly, in regard to the relation of the individual soul to the Supreme Self also, some maintain that relations such as that between the ruler and the ruled are based on a knowledge of distinctions, which is caused by beginningless avidyā ; and that, in truth, there is only one reality.[22] Others hold that though there is non-difference, the jīva is other than the Supreme Self. As there is oneness in point of essence and distinction on account of limiting conditions, some posit both difference and non-difference—difference in so far as it (Brahman) is associated with limiting conditions, and non-difference in respect of its essence.[23]

Even when there is diversity, there is the relation of non-difference (between God and the soul); several views concerning this relation are prevalent—that it is the relation of inherence obtaining between the whole and the part ; that it is the relation between śeṣa and śeṣi, or in other words, that between the independent entity and the dependent creature; that it is the relation between the owner and the owned exemplified in the relation between master and servant.

---

20. Vedānta.
21. Nyāya-Vaiśeṣika.
22. Advaita.
23. Bhāskara.

११. तथा परमपुरुषार्थभूते ब्रह्मप्राप्तिलक्षणमोक्षेऽपि स्वरूपोच्छित्तिलक्षणः, अविद्यास्तमयलक्षणः निश्शेषवैशेषिकात्मगुणोच्छेदलक्षणः कैवल्यरूपः, तद्भाव(साधर्म्य)लक्षणः[२७], तद्गुणसंक्रान्तिलक्षणः, तच्छायापत्तिलक्षणः, सांसिद्धिकानन्दादिस्वरूपाविर्भावलक्षणः, तद्गुणानुभवजनितनिरतिशयसुखसमुन्मेषोपनीतात्यन्तिकतत्किङ्करत्वलक्षण इति तथा तथा विवदन्ते ।

१२. तत्साधनतोऽपि कर्मयोगलभ्यः, ज्ञानयोगलभ्यः, अन्यतरानुगृहीतान्यतरलभ्यः, उभयलभ्यः, उभयपरिकर्मितस्वान्तस्यैकान्तिकात्यन्तिकभक्तियोगलभ्य इति ।

11. Even in regard to the supreme goal of human endeavour, mokṣa, which consists in the realisation of Brahman, the several views maintained are—that it (mokṣa) consists in annihilation of one's self[24]; that it is the destruction of ignorance,[25] that it is the state of aloofness resulting from the complete destruction of all the special qualities of the self[26]; that it is a state of becoming one with Brahman[27]; that it is the inflow of God's qualities[28]; that it consists in attaining similarity with Brahman[29]; that it is the fullest revelation of its (self's) intrinsic attributes of bliss and other qualities; that it is everlasting service to the Lord kindled by the heightened manifestation of unsurpassed bliss arising from the experience of His qualities and so on.

12. About the means of attaining mokṣa also, some contend that it is attainable by karma-yoga and some that it is realisable by jñāna-yoga; some contend that it is attainable by either of these (two) helped by the other[30]; some assert that it is rendered effective by both[31]; some assert that to him whose mind is purified by both (karma and jñāna), it is realisable by bhakti-yoga which is ever-lasting and one-pointed.

---

24. Buddhism.
25. Advaita.

अविद्यास्तमयो मोक्षस्सा च बन्ध उदाहृतः

26. Nyāya-Vaiśeṣika.
27. Advaita.

अत्र यद्यपि कोशेषु साधर्म्यपदमस्ति, तथापि तदनुचितमिव; अवश्यवक्तव्यस्य ऐक्यलक्षण मोक्षस्याकथनप्रसङ्गात् ॥

28. cf. Śiva-Saṅkrāntivāda.
29. cf. Śiva-sama-vāda.
30. Here one of the two is primary and the other secondary.
31. Here both are of equal importance. Jñānakarma-Samuccayavāda.

१३. तदेवमनवसितविशेषविमर्शकजनविमतिदर्शनात् तत्तत्पक्षसाधनबलाबलानवगमाच्च ततस्ततः सन्दिहानाः प्रेक्षावन्तो न तावत् परमपुरुषार्थाय घटेरन्, यावदयमात्मा परमात्मा च स्वरूपतः प्रमाणतः संबन्धतः प्राप्तितः तत्साधनतश्च न निर्णीयेतेति तत्प्रतिबोधाय इदमारभ्यते। यद्यपि भगवता बादरायणेन इदमर्थान्येव सूत्राणि प्रणीतानि, विवृतानि च तानि परिमितगम्भीरभाषिणा भाष्यकृता, विस्तृतानि च तानि गम्भीरन्यायसागरभाषिणा भगवता श्रीवत्साङ्कमिश्रेणापि, तथापि आचार्यटङ्कभर्तृप्रपञ्चभर्तृमित्रभर्तृहरिब्रह्मदत्तशङ्करश्रीवत्साङ्कभास्करादिविरचितसितासितविविधनिबन्धनश्रद्धाविप्रलब्धबुद्धयो न यथावदन्यथा च प्रतिपद्यन्त इति तत्प्रतिपत्तये च युक्तः प्रकरणप्रक्रमः।

१४. तत्र

देहेन्द्रियमनःप्राणधीभ्योऽन्योऽनन्यसाधनः।
नित्यो व्यापी[32] प्रतिक्षेत्रमात्मा भिन्नः स्वतः सुखी ॥

13. Noticing the conflicting views of inquirers who have not determined anything conclusively, not knowing the strength and weakness of the proofs of the respective views, and entertaining doubts therefrom, wise men will be unable to secure mokṣa so long as the individual self and the Supreme Self are not understood in respect of their nature, the means by which they are established, their relation (to each other), the attainment (of mokṣa by the individual self), and also of the means thereof. For this reason, this work is begun to make them known. The aphorisms (sūtras) having the same end in view were composed by the venerable Bādarāyaṇa; and these have been interpreted by the Bhāṣyakāra (Dramiḍācārya) whose exposition is concise and elegant; and they have been elaborately explained by the venerable Śrivatsāṅka Miśra who elegantly sets forth an ocean of rules of interpretation (nyāyas). Nevertheless, as persons whose understanding has been misled by faith in the various writings, good and bad, of such teachers as Ṭaṅka, Bhartṛprapanca, Bhartṛmitra, Bhartṛhari, Brahmadatta, Śaṅkara, Śrīvatsāṅka Miśra, Bhāskara, etc., do not know things as they are and even understand them erroneously, the undertaking of this work is but proper for a right knowledge of things.

14. The view to be defended here is that the individual self is different from the body, the senses, manas, prāṇa and intellect; (it) does not depend on anything else (for its knowledge); (it) is eternal, subtle, distinct in each body, and in its essential nature blissful.

---

32. श्रीभाष्ये जिज्ञासाधिकरणे अहमर्थात्मत्वसमर्थननिगमनावसरे व्यापी=अतिसूक्ष्मतया सर्वचेतनान्तःप्रवेशस्वभाव इति व्याख्यातम्।

१५. ननु देहमेवात्मानं प्रत्यक्षतः प्रतिपद्यामहे, अहं जानामीति ज्ञाता ह्यात्मा अहमिति चकास्ति, देहश्चाहङ्कारगोचरः स्थूलोऽहं कृशोऽहमिति दर्शनात्, देहस्य हि स्थौल्यादियोगः, अतस्तत्समानाधिकरणतया अयमहङ्कारश्शरीरालम्बन इत्यवश्याश्रयणीयम्, इतरथा सकललौकिकपरीक्षकव्यवहारोपरोधश्च; न चायं लाक्षणिको व्यवहारः मुख्यवृत्तिभूमेः पृथगसिद्धत्वात्। न चानेकावयवयोगिशरीरालम्बनत्वे ज्ञात्रवभासस्य तदीयरूपावयवाद्यवभासेनान्वयिना भवितव्यम्, येन तदन्वयाभावाज्जानामीति प्रत्ययः शरीरातिरिक्तमवगमयेत्। बाह्येन्द्रियप्रत्यक्ष एव तथा नियमदर्शनात्, स्वान्तस्यान्तरगुणाधारतावभास एव सामर्थ्यनियमात्, अनवधृतावयवविशेषस्याप्यनेकावयवयोगिनो महिमगुणशालिनस्त्र्यणुकस्य

THE CASE FOR THE IDENTITY OF SOUL AND BODY.

15. We perceive the body itself to be the soul. In the cognition 'I know', the ātman, who is indeed the knower, shines forth as the 'I'; and the body is the object of the consciousness of 'I', as is evident from the knowledge 'I am stout', 'I am lean'; in fact, stoutness and the like relate only to the body; hence, as the 'I' is put in apposition with 'lean', 'stout', etc., it must necessarily be admitted to have the body for its object. Otherwise, all usage, popular and learned, would be meaningless. It cannot be maintained that here (in statements like 'I am stout') the 'I' denotes the body by a figure of speech (lakṣaṇā), because there is no other place where it can possibly be said to have a primary significance.

Again, it cannot be said that if the consciousness of the 'I' as knower has for its object the body which consists of several parts, the knowledge of the body should be accompanied by a knowledge of its parts, colour, etc. If there were such a need, as the knowledge of bodily parts and colour does not appear, the cognition 'I know' would reveal the presence of something other than the body. Such a necessity (of the knowledge of parts and shapes accompanying the apprehension of an object) is found to exist only in the case of perception arising from the external senses. The capacity of the mind is restricted to the manifestation of the soul's character as being the seat of internal qualities. In fact, (even in the case of external perception) there is no necessity for the apprehension of number, magnitude, etc., because, though its parts are not comprehended, a triad of atoms consisting of many parts and possessing visible magnitude is admitted to be the minimum visible entity; and because air is known to be perceived by the sense of touch only as the seat of contact (and not as a whole consisting of parts). Just as, even when something other than the body is taken to be the

प्रथमप्रत्यक्षाभ्युपगमात् , वायोश्च त्वगिन्द्रियेण स्पर्शाधिष्ठानमात्रतयोपलम्भदर्शनाच्च न बाह्यप्रत्यक्षगोचर एव संख्यापरिमाणादिग्रहणनियमः ।[33] देहव्यतिरिक्तात्मगोचरत्वेऽपि यथा तत्र तदीयगुणान्तराग्रहणं तथेहापि । एवं च प्रत्येकं परमाणुषु चैतन्यानुपलब्धेः तदभ्युपगमे च एकशरीर एवानेकसहस्रचेतनापातात् , अकारणगुणपूर्वकस्य कार्यद्रव्यवर्तिनो विशेषगुणस्यासम्भवान्न शरीरविशेषगुणश्चैतन्यं, अयावच्छरीरभावित्वाच्च इत्यादयोऽनुमानभेदाः प्रत्यक्षबाधितविषयतया न पराक्रमितुं क्षमन्ते । विशेषगुणत्वे च प्रतिषिध्यमाने देहगुणत्वाभ्युपगमप्रसङ्गश्च । अपि च इच्छानुविधायिक्रियत्वेन्द्रियाश्रयत्वादयः[34] शरीरे दृश्यमानाः संप्रतिपन्नाचैतन्यात् घटादेरत्यन्तव्यावर्तमानाः शरीरमेव चेतनमवगमयन्ति ।

object of self-consciousness, there is no knowledge of its other qualities, here too (when the body is the object of self-consciousness, there is no knowledge of its parts and colours).

In each of the infinitesimal atoms consciousness is not met with; and if it be accepted (that each super-sensible atom possesses consciousness), there will result belief in several thousands of intelligent beings in one and the same body; and as the special quality of the effect cannot but be based on the quality of the cause, and as consciousness does not continue as long as the body lasts, consciousness cannot be a special quality of the body. These and other kinds of arguments based on reasoning are lacking in force, as they teach what is contradicted by direct perception. If it (consciousness) be denied to be a special quality, it will amount to its acceptance as a common quality of the body. Moreover, qualities such as the character of owning activities dependent on desires and of being the seat of the senses and the like, which appear in the body and not in such objects as pots, whose non-intelligent character is admitted on all hands, reveal that the body itself is the intelligent being.

---

33. कोशेषूपलभ्यमानः पाठो नातीव सुन्दरः । नियमस्य द्व्यणुके वायौ च व्यभिचारस्य पूर्वमेव प्रदर्शितत्वान्नञ्रहितः पाठो विरुद्धार्थको भाति । अतः 'अभ्युगमात्' 'दर्शनात्' इति पञ्चम्यन्तद्वयस्य साध्यसाकांक्षस्य न बाह्यप्रत्यक्ष......................ग्रहणनियम इत्यत्रान्वयो युक्तः । बाह्यप्रत्यक्षविषयेऽप्येतादृशो नियमो न संभवति किमुतान्तरप्रत्यक्षविषय इति भावः ॥

34. यद्यप्यत्र कोशेषु पाठोऽन्यथोपलभ्यते, तथापि स न समीचीनो भाति । अत्र चेष्टेन्द्रियार्थाश्रयश्शरीरमिति न्यायसूत्रमभिप्रेतम् । तच्च लक्षणत्रयपरम् । आदिना अर्थाश्रयत्वस्य ग्रहणम् । प्रतिविधानावसरेऽपि इन्द्रियाश्रयत्वादिव्यतिरेकहेतवः न साध्यमुपस्थापयितुमीशत इत्यनूदितम् ।

क्रमुकफलताम्बूलदलावयवादिषु प्रत्येकमविद्यमानस्यापि रागस्येवावयविनि संयोगविशेषात् देहारम्भकपरमाणुसंश्लेषविशेषादेव देहे चैतन्यस्याप्याविर्भावो नानुपपन्नः । चर्वणजनित-हुतवहसंयोगसंपादितपाटलिमभिः परमाणुभिर्द्व्यणुकादिक्रमेण कारणपूर्व एव तत्र रागोदय इति चेन्न । प्रमाणाभावात्, अपि च सितासितादितन्तुषु प्रत्येकमविद्यमानमपि चित्ररूपं विशेषगुणं तदारब्धे पटे स्फुटमुपलभमानाः कथं कारणगुणपूर्वकत्वमुक्तगुणस्याध्य-वस्येम । न चावयवरूपातिरेकेणावयविनि चित्रं नाम रूपान्तरं नास्त्येव । अवयविनो-ऽचाक्षुषत्वप्रसङ्गात्, अवयवरूपैरेव तदुपपादने सर्वमेव कार्यद्रव्यं नीरूपमापद्येत, अनुभव-विरोधः, सर्वव्यवहारविरोधश्च । विशेषगुणश्च काठिन्यं करकाद्रव्यवर्ति अकारणगुणपूर्वकं दृश्यत इत्यनैकान्तश्च । न च संयोगविशेषः काठिन्यम् । तस्य द्विष्ठत्वात्, अस्य तु करकाद्रव्यैकवर्त्तित्वात्, स्पर्शविशेषतया पदार्थविद्भिरभ्युपगमाच्च । दृश्यस्य देहस्य कथं

It is not improper to maintain that just as the red colour, which is absent in the parts of the areca nut and betel leaf severally, emerges on account of a particular combination of these in the whole, even so intelligence emerges in the body, only on account of a particular combination of infinitesimal atoms which give rise to it. There is no warrant for the objection that in the instance cited, from out of the infinitesimal atoms rendered red by the heat generated in the act of chewing (betel leaf and nut) in the order of binaries, etc., red colour emerges strictly only in conformity with the quality of the cause. Further, although the special quality of variegated colour is not found in white, black and other threads severally, we clearly perceive it in the cloth made out of these. How, then, can we assert that the quality of the effect is dependent on that of the cause ? Again, it cannot be said that over and above the colours of the constituent parts there is no other colour known as the variegated colour in the whole ; for, in that case, the whole would become imperceptible. If it be said that the whole becomes visible only on account of the colours of the parts, it would follow that all effects would be deprived of their colours. That would contradict experience as also all usage. As the special quality of hardness existing in ice is not found to be dependent on the quality of the causal substance (water), the argument commits the fallacy of *anaikānta.*

Again, hardness cannot be said to be a particular form of conjunction, because it exists in two objects, while hardness exists in one, namely, ice, and because people who know the nature of things have admitted hardness to be a form of contact. It may be asked how the body which is an object of perception can be regarded as the knower. What

द्रष्टृत्वमिति चेत्को विरोधः, अयमेव यदेकस्यां क्रियायामेकस्य कर्मत्वं कर्तृत्वं च न घटत इति । यद्येवं व्यतिरेकवादे वा कथमात्मन्यहमिति प्रत्ययः; रूपभेदादिति चेत्समानमिदं देहात्मवादेऽपि । अपि च परसमवायिक्रियाफलभागि कर्म, स्वसमवेतज्ञानफलभागिनः शरीरस्य कर्मत्वमेव नास्तीति न पर्यनुयोगावकाशः, अतो देह एवात्मेति बार्हस्पत्याः । तथा च पृथिव्यापस्तेजोवायुरिति तत्त्वानि तेभ्यश्चैतन्यं किण्वादिभ्यो मदशक्तिवदिति सूत्रम् ॥

१६. अत्र प्रतिविधिर्देहो नात्मा प्रत्यक्षबाधतः ।
न खल्वहमिदङ्कारावेकस्यैकत्र वस्तुनि ॥

अहं जानामीति प्रत्यग्वृत्तिरहमिति मतिः इदंकारगोचराच्छरीरान्निष्कृष्टमेव स्वविषयमुपस्थापयति घटादेरिव । पराग्वृत्तिरिदमिति शरीरविषयिणी च शेमुषी स्वविषयमहङ्कारगोच-

is the contradiction involved in this? The incompatibility lies precisely here—in regard to one act, it is not possible for one and the same substance to be at once the object and the agent of action. If this were so, even on the other view (that something other than the body is the self), how can the self (the perceived) appear as the 'I' (the perceiver)? If it be replied that it is due to a difference of aspect, then it is equally applicable to the doctrine that the body is the self. Besides, an object (of knowledge, and, for that matter, of any activity) is that which shares the fruits of actions which are found in intimate association with something other than itself; but the body experiences the results of knowledge found intimately associated with itself and hence does not possess the character of being an object. Hence there is no room for the objection (How can the body be both the subject and object?). Therefore, the followers of Bṛhaspati hold that the body itself is the soul. To that effect their sūtra runs—intelligence emerges from the elements of earth, water, fire and air, just as the intoxicating quality springs from herbs, etc.

THE REFUTATION OF THIS (DOCTRINE)

16. The body cannot be the soul, because (the doctrine of the identity of the body with the soul is) contradicted by perception. One and the same substance cannot appear as 'this' and 'I' to an identical person. Just as the inward knowledge of 'I' involved in the consciousness 'I know' exhibits its object to be distinct from pots and the like, it reveals its object to be distinct from the body which is the object of the consciousness 'this'. Just as the cognition 'This is a pot' (marks off its object to be distinct from the object of the consciousness of 'I'),

राद्विवेचयतिं यथायंघट इति । इतरथा स्वपरविभागानुपपत्तेः । नचैकस्मिन्नेव रूपभेदादेवं प्रतीतिः । नहि देवदत्तो दण्डिनमात्मानं दण्डय्यमिति प्रत्येति । अन्यच्च नियमितबहिरिन्द्रियवृत्तेरवहितमनसोऽहमिति स्वात्मानमवयतः करचरणोदराद्यवयवा न भासन्ते । स्थवीयसि चावयविनि शरीरेऽहमिति मतिगोचरेऽभ्युपगम्यमाने अवश्यमवयवप्रतिभासेनाप्यन्वयिना भाव्यम् । नह्यस्ति संभवः—अवयवी स्थवीयान् प्रचकास्ति, अवयवास्तु न केचन प्रथन्त इति । यत्तु त्र्यणुके व्यभिचार इति । तन्न । वातायनविवरदृश्यनिर्भागत्रसरेणुव्यतिरेकेण परमाणुस्वीकारे कारणाभावात् । प्रत्यक्षयोग्यावयवस्य तथा प्रतिभासनियमाद्वा न व्यभिचारः । न चावयविनि बहिरिन्द्रियग्राह्य एवायं नियम इत्युत्प्रेक्ष्यम् । प्रमाणाभावात् । अन्तःकरणस्य च केवलस्यावयविनि वृत्त्यसंभवाच्च । वायोस्तु रूपाद्यभावात् केवलस्पर्शाधारतयोपलम्भः । तत्रापि तादृशानेकावयवप्रतिभासोऽस्त्येव

even so the outward knowledge 'this' having the body for its object, distinguishes its object to be distinct from the object of self-consciousness. Otherwise, there will be no basis for the distinction between 'myself' and 'others'. It cannot be urged that one and the same thing may, from different aspects, appear in this manner (as 'I' and 'this'), because Devadatta wielding a stick does not understand himself as 'This person possesses a stick' (but only as 'I wield a stick'). Moreover, to a person who has controlled the activities of his external senses and attained mental concentration and known the self as the 'I', the knowledge of organs such as hands, legs and belly does not arise. And if the body which is big and possesses parts were taken to be the object of self-consciousness, a knowledge of the organs must necessarily accompany it. It is impossible for the body which is big and which owns parts to be known when none of its parts is cognised. The instance of the tryaṇuka (triad of atoms) which was cited as disproving the general proposition (that whenever the whole is perceived its parts also should be perceived) does not really disprove it, for there is no warrant for accepting the existence of infinitesimal atoms over and above the triads which are devoid of parts and which are perceivable (in sun's rays proceeding) through the hole of the window. (Even granting the existence of infinitesimal atoms) this general proposition is not falsified, because it applies only to perceptible parts. Again, it cannot be contended that this law obtains only in the case of the complex whole cognised by external organs, as there is no warrant (for the same). Besides, in comprehending a whole composed of parts the internal organ, in itself, does not operate. As for the case of air, it is known as the seat of touch only, because it has no colour, etc.; besides, even here, as in the case of the

स्पृश्यमान इव घटादाविति न तेन व्यभिचारः। यत्तु स्थूलोऽहं कृशोऽहमिति शरीरेऽहं प्रत्ययो दृश्यत इति। तदपि पर्यालोचनीयम्। तत्राप्यन्तश्शरीरमहङ्कारमेव किमपि वस्त्वहंकारो गोचरयति, न पुनश्चाक्षुष इव देहप्रत्ययः स्थौल्यबाल्यादियोगिदेहमात्रम्। अत एव ममेदं गृहमितिवन्ममेदं शरीरमिति भेदप्रतिभासो व्यवहारश्च। नह्यसौ साक्षात्प्रतीतभेदनिमित्तः प्रतीयमानः शिलापुत्रकशरीरव्यपदेशवदौपचारिको युक्त आश्रयितुं ममात्मेतिवत्। तत्रास्मच्छब्दस्य आत्मनि वृत्तेरैकार्थ्यादविवादाच्च युक्तं तथाश्रयणम्। न चैवमत्र। अतो देहव्यतिरेकिणश्चेतनस्य प्रत्यक्षसिद्धत्वात् तत्संबन्धिनि लाक्षणिको देहेऽहंशब्दप्रयोगः। बाह्यविषयेषु परस्परविरुद्धरूपपरिमाणसङ्ख्यासन्निवेशग्रहणेन व्यतिरेकस्य स्फुटत्वादात्मनि तादृशरूपान्तराग्रहणेन देहाभेदप्रतिभासोऽविवेकिनाम्। इतश्च इच्छानुविधायिस्वव्यापारोऽयमात्मा, इच्छयैव हि सङ्कल्पयति स्मरत्यूहति च, शरीरमपि

pot which is being touched, there is knowledge of such diverse parts; hence, no discredit to the general law on this score. The contention that from statements such as 'I am stout', 'I am lean', the self is found to have the body for its object deserves examination. Even there, self-consciousness has for its object some entity which is only inside the body; and like the knowledge of the body, gained through visual perception, it does not relate to the body only which has the characteristics of stoutness, youthfulness and the like. Hence the apprehension of difference and the usage 'This is my body', as in the case of the expression 'This is my house'. This usage ('This is my body') being based on directly perceived difference, it is not proper to urge that it has to be interpreted figuratively like the expression 'This is my self', 'This is the body of the doll'. As the word 'my' denotes the self and as the two words (my and self in the statement 'This is my self') have an identical meaning and as there is no dispute concerning this, a figurative interpretation is proper. But it is not so here (in the statement 'This is my body'). Because a conscious entity distinct from the body is established by perception, the word 'I' (in the proposition 'I am stout') denotes by a figure of speech, the body which is related to the self. With regard to external objects, as there is knowledge of mutually exclusive colours, size, number and configuration, diversity is explicit; but, in the case of the soul, as there is no knowledge of such divergent qualities, to the ignorant there arises the illusion of the body being non-different from the soul. Again, the self has his activities determined by his desires, for, he wills, remembers and infers only at the instance of his desires; the body too has its activities, such as lying down, sitting and standing, determined by his desires; hence arises the illusion of

तदिच्छानुविधायिशयनासनोत्थानादिचेष्टमिति भवत्यभेदभ्रमः शुक्तिरजतादाविव । प्रणिहितमनसस्तु ज्ञातृतया सिद्ध्यन्तमहमाकारमर्थमनवयवमिदमिति परिस्फुरतः स्थूलादवयविनश्शरीरात्पृथगपरोक्षयन्त्येव । भवन्ति च जानामीति प्रत्ययः शरीरविषयो न भवति, अर्थान्तरविषयो वायम्; अप्रकाशमानतदवयवप्रतिभासत्वात् । य एवं प्रकारः स तथा, यथा अयमिति प्रतिभासः । यच्छरीरविषयं न तत्तथा । यथा उभयसंमतं शरीरज्ञानम् । तथा शरीरं अहंप्रत्ययगोचरो न भवति इदमिति गृह्यमाणत्वात् बाह्येन्द्रियग्राह्यत्वाद्वा घटादिवदिति । किञ्च—

अपरार्थं स्वमात्मानमात्मार्थेऽन्यच्च जानतः ।
सङ्घातत्वात्परार्थेऽस्मिन्देहे कथमिवात्मधीः ॥

सर्वस्य बाह्याभ्यन्तरभोग्यवर्गस्य शब्दसुखादेरात्मार्थतां भोक्तुश्चात्मनोऽनन्यार्थतां सर्वस्य शेषितां प्रत्यक्षतः प्रतिपद्यामहे । न च शरीरमनन्यार्थं सङ्घातत्वात् । सङ्घाता हि सर्वे परार्था दृष्टाश्शयनासनरथादयः । न च संघाताः संहतशरीराद्यर्था दृश्यन्त इत्यात्मनो-

non-difference as in the case of the shell and silver. Thinking minds, however, perceive the entity known as 'I' which has to be recognised as knower and which is devoid of parts to be really distinct from the body which appears as 'this' and which is stout and consists of parts. As the knowledge of bodily parts is absent in the consciousness 'I know', either it does not have for its object the body or has for its object something other than the body. Wherever there is absence of apprehension of bodily parts, the body is not the object of knowledge, but something else, as in the case of the consciousness 'This is a pot'. The knowledge which has the body for its object is, however, different (that is, there is not absence of knowledge of parts of the body), as in the instance of knowledge of the body accepted by both of us. Again, the body cannot be the object of self-consciousness, because it is known to be 'this' or because it is grasped by external senses, as in the case of the pot, and the like. Moreover, how can he who has known his self to exist for the sake of nothing other than himself, and known other objects to exist for his sake, take this body which exists for the sake of others, for the reason of its being a collection of parts, to be the self? We directly perceive that the entire collection of internal and external objects of experience, such as sound and pleasure, exists for the sake of the self; while the self, the enjoyer, does not exist for the sake of others, but is the one object for whose glory and service everything else exists. Being a collection, the body cannot but exist for the sake of others; and all aggregates such as bed, seat and chariot are indeed found to

ऽपि संहतत्वमापद्यत इति वाच्यम् । तथा सति तस्यापि परार्थत्वप्रसंगात् । अपरार्थश्चायमात्मा प्रत्यक्षतः प्रकाशत इत्युक्तम् । योग्यानुपलंभबाधितं चात्मनि संघातत्वम् । संघातान्तरार्थत्वे च तस्यापि तथा ततोऽन्यस्यापि तथेति न व्यवतिष्ठेत । न च व्यवस्थायां सत्यामव्यवस्था युक्ता । न च सङ्घातस्य परार्थत्वे परस्य संहतत्वमपि प्रयोजकम् । भोक्तृतयैवात्मनः स्वार्थसंघातं प्रति परत्वोपपत्तेः । व्याप्त्यनुपयोगिनोऽपि दृष्टान्तदृष्टधर्ममात्रस्यानुरोधेनानुमानमिच्छतः सर्वानुमानोच्छेदप्रसङ्गः ॥

अस्फुटत्वेऽपि भेदस्य शरीरे तदसम्भवात् ।
तद्गुणान्तरवैधर्म्यादपि ज्ञानं न तद्गुणः ॥

सर्व एव कार्यद्रव्यगतविशेषगुणः कारणगुणपूर्वक इति कथमतत्पूर्वकः शरीरे चैतन्यगुणः संभवेत् । यत्तु बार्हस्पत्यं वचनं "पृथिव्यापस्तेजो वायुरिति तत्त्वानि तेभ्यश्चैतन्यं किण्वादिभ्यो मदशक्तिवत्" इति । तदनुपपन्नम् । शक्तेरविशेषगुणत्वेन तथोपपत्तेः ।

exist for the sake of others. It cannot be argued that as all collections are known to be for the sake of the body and the like which are themselves collections, the self also should be an aggregate ; for, if it were so, the self too would have to exist for the sake of others ; but it has already been stated that the self is directly perceived to exist not for the sake of others. On account of the non-perception of the collective nature of the self—a nature which is capable of being perceived—the belief that the soul is an aggregate stands condemned. If the self exists for the sake of another collection, the latter must also exist for the sake of some other collection and that for another and so on *ad infinitum.* But where an end is possible, an unending chain is undesirable. Moreover, when a collection exists for the sake of something else, it is not because that other is itself a collection. It is only in virtue of his nature as enjoyer that the self becomes that other for whose sake all collections exist. For him who attempts to base his inference on all the qualities of the illustrative example, even though they may be unserviceable to the general law, all inference would be impossible.

Even though the distinction between the two (the body and the self) may not be explicit, consciousness cannot be a quality of the body, as it cannot exist in it and as being quite unlike its other qualities. As all the special qualities existing in the effect are dependent on those of the causal substance, how can consciousness exist in the body without depending on the quality of its cause. Bṛhaspati's teaching—that earth, water, fire and air are the realities and that from these consciousness arises just as the intoxicating quality emerges from herbs, etc.—is un-

सर्वद्रव्येषु तत्तत्कार्यसमधिगम्यः तत्प्रतियोगिशक्त्याख्यो गुणस्साधारणः। नैवं चैतन्यम् देहैकगुणत्वाभ्युपगमात् कार्यत्वे सत्येकविधप्रत्यक्षसिद्धतया च विशेषगुणत्वात्। द्रव्यान्तरसंयोगसमासादितमदशक्तिभिरकार्यभूतैः परमाणुभिर्निजगुणपुरस्कारेण स्वकार्य-द्रव्येषु मदशक्त्युत्पादोऽपि नानुपपन्नः। ताम्बूलरागस्तु पूर्वद्रव्यावयवविभागानन्तरं द्रव्यान्तरसंयोगजनितरक्तिमगुणैः कारणैः क्रियते। दृश्यते हि तत्रावयवेष्वपि प्रत्येकं रक्तिमगुणः। न च शरीरावयवेषु प्रत्येकं चैतन्यगुणः प्रज्ञायते प्रतिज्ञायते वा। तदुपगमे च एकशरीर एवानेकचेतनापातादङ्गाङ्गित्वाभावः प्रतिसंधानव्यवहारलोपश्च देवदत्तदृष्ट इव यज्ञदत्तादेः। यत्तु अकारणगुणपूर्वकं चित्ररूपं पट इति। तन्न। नानारूपता हि चित्रता। सा च नानारूपैस्तन्तुभिः क्रियत इति किमनुपपन्नम्।

tenable. As power is not a special quality, it may be so (that is, need not be dependent on the quality of the causal substance). In all substances the quality known as causal power concerning the effect, cognisable from their respective effects, is a common quality; but consciousness is not so, because it is admitted to belong to the body only and because it is a special quality, as it, while remaining an effect, is cognised by one form of perception. It is not wrong to maintain that, on the basis of their own quality, from out of infinitesimal atoms, which are not effects and which acquire the intoxicating quality from the mingling of different substances, the intoxicating quality arises in their effects.

The redness caused by betels, etc., is, likewise, produced by causes which possess the red colour generated by the mixing of different substances, after their parts have lost their cohesion (in the act of chewing); hence the red colour perceived in each of their parts too. Consciousness is not found in the parts of the body individually, nor have they been said to possess it. If that were admitted, as it would follow that in one and the same body there must be many thinking beings, it is impossible to say which is primary and which is secondary; besides, all reference to recognition would be impossible. Just as in respect of what has been seen by Devadatta, there cannot be recognition on the part of Yajñadatta, here also (what has been perceived by one part of the body cannot be recognised by another). The statement made before, namely, that the variegated colour found in the cloth is not dependent on the quality of the cause, is erroneous. The quality of variegated colour is nothing but that of being many coloured; and this (variegated colour) is produced by threads of different colours; hence there is nothing objectionable here. Though the variegated colour

प्रत्येकमविद्यमानमपि तच्चित्ररूपं तन्तुषु संहतेषु दृश्यत एव चित्रा इमे तन्तव इति॥ सम्भूय च तेषां पटारम्भकत्वम्। एवं तत्कारणेष्वपि तदिति न क्वचिद्व्यभिचारः। नचैकरूपनियमाभावेनावयविनोऽचाक्षुषत्वम्। महत्त्वैकार्थसमवायिना रूपवत्त्वेनैव चाक्षुषत्वसिद्धेः। अस्तु वा चित्रं नाम एको रूपविशेषः। स तु रूपैरेव कारणगतैर्नानाविधैरारभ्यत इति दृष्टम्। नचैवमवयववर्तिभिरेव चैतन्यैरवयविनि शरीरे चैतन्यविशेषारम्भः। चितितन्मात्रस्यैव तेष्वसम्भवात्। अतो न देहगुणश्चैतन्यम्। एतेन सुखादयोऽपि शरीरगुणाः प्रत्युक्ताः। अपिच दृढ एव शरीरे विरोधिगुणापातमन्तरेण कुसुमविलेपनगंध इव निवर्तमानश्चैतन्यसुखादिर्न तद्गुणो भवितुमर्हति। न खलु तद्विशेषगुणा रूपादयस्तथा निवर्तन्ते॥

आत्मनः परेषां च शरीरगुणाः प्रत्यक्षयोग्याः बाह्येन्द्रियग्राह्याश्च। न च तथा ज्ञानादिरिति नासौ तद्गुणः। किञ्च—

does not exist in each of the threads severally, it is certainly noticed in the threads which combine and are known as threads of variegated colours. The capacity to produce cloth belongs to threads only in their togetherness; thus, the variegated colour exists even in the cause of cloth; hence there is nowhere any violation (to the rule that the qualities of the effect are dependent on those of the causes). It cannot be maintained that the whole (the cloth) becomes invisible inasmuch as it does not possess any one specific colour, for, it may become perceptible by the very fact of its possessing inherently colour along with bigness. Let variegated colour be taken to be one specific colour. Even then it is found to be produced by the different colours existing in the causes. It cannot be asserted that it is only the consciousness resident in the parts that produces the particular consciousness in the body, which is composed of those parts, for, consciousness in general cannot exist in the parts. Therefore, consciousness is not a quality of the body. On the same count, the belief that pleasure and other qualities belong to the body stands condemned. Besides, as consciousness, pleasure, etc., vanish from the body, like the smell of flower and sandal, even when the body continues to be strong and in the absence of counteracting qualities, they cannot be the qualities of the body. Colour and other special qualities of the body, however, do not leave it in the same manner.

The qualities of the body are perceptible to us as well as to others and are also to be grasped by external senses; but not so consciousness, etc. Therefore, they are not the qualities of the body. Further, the

ACKNOWLEDGMENTS

Uber Die Gruppen Birationaler Transformationen Der Elliptischen Und Der Hyper Elliptischen Kurven In Sich.

Eine Methode Zur Approximativen Berechnug Einseitig. Eingespanuter Druckstabe Mit Veranderlischen Querschnitt.

The Twelfth Annual Report of the East India Cotton Association, Limited, Bombay.

Report of the Southern India Chamber of Commerce.

War Cry.

The Salem District Urban Bank, Limited, Jubilee Souvenir.

Qutbshāhi of Golcondā in the Seventeenth century.

Staats-und Universitats-Bibliothek : Hamburg.

1. *Lenz: Fur die Hamburgiesche Universitat 1918.*
2. *Forster : Zehn Jahre Hamb. Vorlesungswesen 1906.*
3. *Klussmann : Die Entwicklung des Hamb. Vorlesungswesen 1901.*
4. *Hamburg, Her Political, Economic and Cultural Aspects 1912.*

Kungl. Universitetes Bibliotek : Uppsala
Four mathematical dissertations by

1. *Matell 1924.*
2. *Matteson 1905.*
3. *Stenstorm 1925.*
4. *Varmon.*

The Studies of Old and Modern India (Alt-und Neu-Indische Studien) by Professor Skhubring, Hamburg.

1. *Die Rama-Sage beiden Malaien, Ihre Herkunft und Gestaltung.*
2. *Der Kumarapalapratibodha.*
3. *Sayast-ne-sayast.*

Annual Report of the Indian Central Cotton Committee.

Administration Report of the Bombay Port Trust.

Bharat Itihas Sanshodapika Mandala.

Imperial Preference for India—By D. R. Gadgil.

Twelfth Annual Report of the Bombay Presidency.

Infant Welfare Society, 1932.

EXCHANGE LIST

The Servant of India Society

Hindustan Review

Half Yearly Journal of the Mysore University

Economica

Philosophical Quarterly

Journal of the Indian Chemical Society

Reading University Gazette

Mysore Economic Journal

Chemical Abstracts

The Punjab University Gazette

Journal of the Bombay University

Quarterly Journal of the Mythic Society.

Publications by the Oriental Library, Baroda.

Publications by Kungl. Universitetes Bibliotek, Uppsala, Sweden.

Publications by Tohoku Imperial University, Sendai, Japan.

Journal of the Madras University.

Bulletin de L'Ecole Francaise d'Extreme-Orient—Ecole Francaise d'Extreme-Orient, Hanoi (Indo-China)

Djwa—Java-Institute, Kweekschoollaan, Jogajkarta, Java

Varendra Research Society, Rajshahi, Bengal—Annual Report and Monographs

Quarterly Journal of the Kannada Literary Academy.

Journal of the Andhra Historical Research Society.

Indian Culture.

Scripta Mathematica.

Indian Historical Quarterly, Calcutta.

Publications of the Bombay Royal Asiatic Society.

The Indian Library Journal

Review of Philosophy and Religion

UNIVERSITY PUBLICATIONS

Names of Publications	Price Rs. A. P.	Where available.
1. Factory Labour in India By Prof. A. Mukhtar ..	3 0 0	Messrs. C. Coomaraswami Naidu & Sons., 27 and 35, Chinnatambi St., Madras.
2. Bhoja Raja By Prof. P. T. Srinivasa Ayyangar ..	1 8 0	do.
3. Swaramelakalanidhi By Mr. M. S. Ramaswami Ayyar ..	2 0 0	do.
4. Naveena Tarkam By Mr. K. R. Applachariar ..	2 0 0	do.
5. The Annamalai University Miscellany—Per year ..	1 0 0	The Editor, The Annamalai University Miscellany, Annamalainagar.
6. The University Journal Published by the University—Annual Subscription ..	7 0 0 (Internal) 10s. (Foreign)	The Editor, The University Journal, Annamalainagar.

IN THE PRESS

1. Text and commentary of *Tatvavibhava* by Parameswara, a commentary on Vacaspati Misra's *Tatvabindu*.
2. A critical edition of *Swarasidhantachandrika* by Srinivasasankhyavan.

PUBLICATIONS

OF

The Inter-University Board, India.

1.	Handbook of Indian Universities	..	2	0	0	*or* 3s.
2.	Facilities for Oriental Studies and Research at Indian Universities	..	0	8	0	
3.	Facilities for Scientific Research at Indian Universities	..	0	12	0	
4.	Bulletin of the Inter-University Board, India, No. 1 to 12	..	1	0	0	*each*
5.	Biological Outlook on life and its Problems.—By J. Arthur Thomson, M.A., LLD., Regius Professor of Natural History, University of Aberdeen	..	0	2	0	
6.	Second Conference of Indian Universities	..	0	12	0	

POSTAGE AND V. P. CHARGES EXTRA.

Available from this office :

A. R. WADIA,

Secretary, Inter-University Board, India,
Mysore.

The Indian Library Journal, Bezwada.

The official organ of the All-India Public Library Association. Expounds the various phases of Library Science and the Library Movement in India.

Annual Subscription Rs. 3.

RATES OF ADVERTISEMENT

Particulars.	Per issue.			Per two issues.		
	Rs.	a.	p.	Rs.	a.	p.
Back Cover	15	0	0	28	0	0
Inside Back Cover	10	0	0	18	0	0
Inside Page	8	0	0	15	0	0
Inside Half Page	4	0	0	8	0	0